# History of arthavada

अर्थवादः

यजुर्वेदः - पूर्वमीमांसा - उत्तरमीमांसा - न्यायदर्शनम् - व्याकरणम् - पुराणम् - साहित्यशास्त्रम्

अर्थं स्तुतिनिन्दारूपम् अधिकार्थं वदतीति अर्थवादः -- ' तत्रोपपदं सप्तमीस्थम् ' पा 3-1-92 , ' कर्मण्यण् ' पा 3-2-1 , ' उपपदमतिङ् ' पा 2-2-19 -- नित्यः उपपदसमासः ।

अत्र न्यायकोशकारः नैयायिकः भीमाचार्यः ---

अर्थस्य प्रयोजनस्य वादः वादनम् । विध्यर्थप्रशंसापरं वचनमित्यर्थः ---

इति षष्ठीसमासमाह - तदसत् -- अयमस्ति विशेषः - ' उपपदसमासो नित्यसमासः , षष्ठीसमासः पुनर्विभाषा ' इति महाभाष्यम् ( उपपदमतिङ् ) । लोके अर्थवादशब्दः नित्यसमासरूपेणैव प्रयुज्यते न तु वाक्यरूपेणापि ।

तत्र तत्र षष्ठीसमासो'पि नित्यसमासत्वेन प्रयुज्यते -- ' यद्धि यदर्थं भवति अयमपि तत्राभिसंबन्धो भवति - ' अस्येदम् ' इति । तद्यथा - गुरोरिदं गुर्वर्थमिति ' - महाभाष्यम् ( चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः पा 2-1-35 ) --

उद्योतः --

भाष्ये - गुरोरिदं गुर्वर्थमिति । षष्ठीसमासो'प्येतद्विषये नित्य एव भाष्यप्रामाण्यादिति बोध्यम् ।

गुर्वर्थमर्थी श्रुतपारदृश्वा -- रघुवंशे (5) .

अत्र तत्त्वं सुधियो विभावयन्तु ।

I am not intending to offer ' the history of अर्थवाद ' as is requested, for temporal and spatial considerations - rather this will be a दिक्सूची । A clear and profound discussion on अर्थवाद-s is available in my (Ph D Thesis) महावाक्यविचारः (online - eGangotri).

It all starts with पूर्वमीमांसा --

In order to generate an urge in the mind of a person to perform / abstain from doing something, commendation / condemnation (स्तुति / निन्दा) is employed and such propensity has been there since time immemorial.

In वेद (जातावेकवचनम्), which is अपौरुषेय and नित्य, also we come across such sentences.

The Vedic literature is put under four headings --

विधि - मन्त्र - निषेध - अर्थवाद - some scholars take नामधेय - उद्भित् etc as a fifth category.

विधि - अर्थवाद - मन्त्र - नामधेय -- इति केषाञ्चन मते ।

Any sentence can be put under either विधि or निषेध - this is universal. If निषेध is accepted as निषेधविधि then विधि only remains.

स्वाध्यायो'ध्येतव्यः ( तैत्तिरीयारण्यकम् , 2 स्वाध्यायब्राह्मणम् - 15 ) - is a विधि that ordains the नित्यकर्म ( ब्रह्मयज्ञः - पञ्चमहायज्ञेषु अन्यतमः ) - वेदाध्ययनम् । So the entire text of वेद , without exception , has to be recited and it means that the complete वेद is सार्थक ( meaningful / useful ) .

While things stand -- there are certain sentences which do not denote either विधि or निषेध -- they simply offer स्तुति or निन्दा , and are called अर्थवाद-s -- here is the पूर्वपक्षसूत्रम् of जैमिनि --

आम्नायस्य क्रियार्थत्वात् आनर्थक्यम् अतदर्थानाम् (पू मी सू 1-2-1-1, अर्थवादाधिकरणम् )

Since वेद is meant for prescribing कर्म-s , the वेदवाक्य-s that do not rule कर्म-s will be rendered unmeaningful / useless .

In the earlier पाद , the  उपक्रमोपसंहार runs like this -- चोदनालक्षणो'र्थो धर्मः  -- तस्य ज्ञानमुपदेशः - तद्भूतानां क्रियार्थेन समाम्नायः --- by this it is clear that the Vedic sentences , that denote विधि / प्रतिषेध with regard to  धर्म / अधर्म , only are प्रमाणम्  and the rest are unmeaningful , i e  they do not denote , at least ,any one of साध्य - साधन - इतिकर्तव्यता ।

शाब्दी भावना = प्रवर्तना --- आर्थी भावना = प्रयत्नः ।

In fact , there are three kinds of अर्थवाद-s --  भूतानुवादः -स्तुत्यर्थवादः - निन्दार्थवादः।

There is not much to discuss in भूतानुवाद ( तथा फलाभावात् , अन्यानर्थक्यात् -- पू मी सू 1-2-1-3,4 ) - which tells the fact --

शोभते'स्य मुखं य एवं वेद ( गर्गत्रिरात्रब्राह्मणम् ) ।

अस्य प्रजायां वाजी जायते , य एवं वेद ।

पूर्णाहुत्या सर्वान् कामानाप्नोति ।

पशुबन्धयाजी सर्वान् लोकानभिजयति ।

तरति मृत्युम्, तरति ब्रह्महत्यां यो'श्वमेधेन यजते ।

शास्त्रदृष्टविरोधाच्च ( 1-2-1-2 ) --

Some sentences preach शास्त्रविरुद्ध - प्रत्यक्षविरुद्ध - संशय - विपर्यय --

स्तेयं मनः - अनृतवादिनी वाक् ।

तस्माद्धूम एवाग्नेर्दिवा ददृशे वार्चिः ।

तस्मादर्चिरेवाग्नेर्नक्तं ददृशे न धूमः ।

न चैतद्विद्मो वयं ब्राह्मणा वा स्मः अब्राह्मणा वा ( गोपथब्राह्मणम् , 5-21 )

को हि तद्वेद यद्यमुष्मिन् लोके'स्ति वा न वेति ( तै सं 7-2 )

सिद्धान्तसूत्रम् --

विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः  ( 1-2-1-7 )

अर्थवाद-s are of two types ---

1.स्तुत्यर्थवादः --

वायव्यग्ग् श्वेतमालभेत भूतिकामः ( तै सं 2-1-1 ) - विधिः ( the one desirous of wealth should perform the याग , wherein वायु is the देवता of श्वेतपशु )।

वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति ( तै सं 2-1-1 ) - स्तुतिः ( वायु is the swiftest देवता , one follows वायु due to his destiny and वायु only gets him wealth .

2. निन्दार्थवादः --

तस्माद् बर्हिषि रजतं न देयं ( तै सं 1-5-1-1 ) - निषेधः ( one should not offer silver as दक्षिणा in a याग ) .

सो'रोदीत् यदरोदीत् तद्रुद्रस्य रुद्रत्वम् ... अश्रुजगं् हि रजतं यो बर्हिषि ददाति पुरास्य संवत्सरात् गृहे रुदन्ति - निन्दा ( रुद्र wept , that is रुद्रत्वम् , silver emerged out of tears, so the inmates of the person , who offers silver as दक्षिणा , would weep , within one year .

The above सिद्धान्तसूत्रम् rules that the अर्थवाद is meant for commendation (स्तुति) and therefore it should be considered as वाक्यशेष (part and parcel of विधि (both at syntactic and semantic levels ) - and as such there will be एकवाक्यता (एकार्थबोधकत्वम् - onesentenceness ) through शेषशेषिभाव , which would help in generating a महावाक्यम् --

' यतः शीघ्रकारिस्वभावतया शीघ्रफलप्रदः वायुः अस्य श्वेतपशोः देवता ततः प्रशस्तमिमं वायुदेवताकं पशुमैश्वर्यकामः संस्पृशेत् ' ।

गुणवादस्तु ( जै सू 1-2-1-10 ) - is a सूत्रम् that would help in applying अर्थवादत्वम् to some sentences such as - आपो वै शान्ताः - here there is व्यभिचार to अर्थवादलक्षणम् -- ' विधेयस्तावकत्वम् '।

द्रव्यसंस्कारकर्मसु फलार्थत्वत् फलश्रुतिः अर्थवादः स्यात् ( जै सू 4-3-1-1 ) -- is also helpful in applying अर्थवादत्वम् to फलश्रुति (see शब्दकौस्तुभ - 'ते'सुरा हे'लयो हे'लयः ...') ।

परकृतिः - पुराकल्पः ---

एककर्तृकवृत्तान्तकथनरूपा परकृतिः - बहुकर्तृकवृत्तान्तकथनपरः पुराकल्पः ।

षष्ठाध्याये जैमिनिना परकृतिपुराकल्पयोः अर्थवादत्वं प्रतिपादितम् -- ' अर्थवादो वा विधिशेषत्वात् तस्मान्नित्यानुवादः स्यात् ( जै सू 6-7-12-30 ) ।

There are other instances and they all are discussed in महावाक्यविचार ।

Here शबरस्वामी explains that following नहिनिन्दान्याय , the purport of निषेध is not निषेध but स्तुति only --

न हि निन्दा निन्द्यं निन्दितुं प्रयुज्यते । किं तर्हि ? निन्दितादितरत् प्रशंसितुम् । तत्र न निन्दितस्य प्रतिषेधो गम्यते किन्त्वितरस्य विधिः ।

So, while teaching / lecturing on रामायण , one should clearly state that the रावणनिन्दा has its तात्पर्यम् in रामस्तुति rather than in रावणनिन्दा and same is the case with भारतम् etc. .

Many people do not know the above aspect.

रामायणम् is a वेद - वेदः प्राचेसादासीत् साक्षाद्रामायणात्मना - such a वेद should not generate द्वेष even against रावण ।

An important aspect of अर्थवाद-s is that they are meant simply to encourage one to do something (प्रवृत्ति) and not to do something ( निवृत्ति ). Therefore the अर्थवाद-s are not to be taken literally .

Hari , in वाक्यकाण्ड of वाक्यपदीयम् explains this aspect --

या प्रवृत्तिनिवृत्त्यर्था स्तुतिनिन्दाप्रकल्पना ।

कुशलः प्रतिपत्ता ताम् अयथार्थां प्रतीयते ॥ 319

(neither स्तुति nor निन्दा is यथार्था, i e real )

विधीयमानं यत्कर्म दृष्टादृष्टप्रयोजनम् ।

स्तूयते सा स्तुतिस्तस्य कर्तुरेव प्रयोजिका ॥ 320

(स्तुति creates an urge in the mind of  कर्ता  -  to do something )

व्याघ्रादिव्यपदेशेन यथा बालो निवर्त्यते ।

असत्यो'पि तथा कश्चित्  प्रत्यवायो विधीयते ॥ 321

Just like a child is stopped from doing something undesirable by saying - 'there is tiger' etc - some पाप, that is unreal, is being stated - रौरवं नरकं व्रजेत् etc. .

मीमांसासिद्धान्तः --

विधिवाक्य-s have got a two-pronged capacity --

1. generating प्ररोचना in कर्म-s

2. generating प्रवृत्ति

The first one is fulfilled by अर्थवाद-s , wherever  available as they are विधिशेष । In the absence of अर्थवद-s , विधिवाक्यम् itself would fulfill both the  tasks .

शेषशेषिभावः , अङ्गाङ्गिभावः (borrowed in व्याकरणम् ), उपकार्योपकारकभावः, गुणगुणिभावः etc are उपाय-s taken up in पूर्वमीमांसा to achieve महावाक्यम् through वाक्यैकवाक्यता and avoid वाक्यभेददोष । All of them end up in विशेषणविशेष्यभाव ।

संभवत्येकवाक्यत्वे वाक्यभेदस्तु नेष्यते (श्लोकवार्तिकम् , प्रत्यक्षसूत्रम् , 9 ) .

उत्तरमीमांसा  ( ब्र सू  3-4-2,3,4,5,6,7 - पूर्वपक्षसूत्राणि )     --

शेषत्वात् पुरुषार्थवादो यथान्येष्विति जैमिनिः -आचारदर्शनात् - तच्छ्रुतेः - समन्वारंभणात् - तद्वतो विधानात् - नियमाच्च

पूर्वमीमांसक-s (see 3rd अध्याय - तन्त्रवार्तिकम्) hold that ज्ञानम् is an अङ्गम् of कर्म --

शाङ्करभाष्यम् (1) --

कर्तृत्वेन आत्मनः कर्मशेषत्वात् तद्विज्ञानमपि व्रीहिप्रोक्षणादिवत् विषयद्वारेण कर्मसंबन्ध्येवेति अतः तस्मिन् अवगतप्रयोजने या फलश्रुतिः सा अर्थवाद इति जैमिनिराचार्यो मन्यते ।

यथान्येषु द्रव्यसंस्कारकर्मसु ----।

सिद्धान्तसूत्रम् --

अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् (ब्र सू 3-4-8 )

शाङ्करभाष्यम् ---

.... तन्नोपपद्यते ।.... तथाहि तमधिकं शारीरादीश्वरमात्मानं दर्शयन्ति श्रुतयः - ' यः सर्वज्ञः सर्ववित् ' ( मुं उ 1-1-9 ) , ' भीषास्माद्वातः पवते भीषोदेति सूर्यः ' ( तै उ 2-8-1 ) ....सर्वं

चैतत् पुरस्तात् तत्र तत्र वर्णितम् ।

न्यायदर्शनम् ---

In न्यायदर्शनम् , अक्षपाद summarizes in four सूत्र-s ( 2-1-62, 63,64,65 ) ---

विध्यर्थवादानुवादवचनविरोधात् - विधिर्विधायकः - स्तुतिनिन्दापरकृतिपुराकल्प इत्यर्थवदः - विधिविहितस्यानुवचनमनुवादः ।

व्याकरणम् ---

Panini touched the aspect of अर्थवाद ( = अधिकार्थवचनम् ) ---

कृत्यैरधिकार्थवचने ( पा 2-1-32 )

समासः --

स्तुतिः -- काकपेया नदी - 'पूर्णतोया नदी यत् तटस्थैः काकैरपि शक्या पातुम् ' ।

निन्दा -- काकपेया नदी - 'अल्पतोया नदी यत् काकैरपि शक्या पातुम् ' ।

पुराणम् ---

In पुराण-s it is परकृति or पुराकल्प ।

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।

वंशानुचरितं चेति पुराणं पञ्चलक्षणम् ॥ अमरः

साहित्यशास्त्रम् ---

There will be अष्टादशवर्णन-s in a महाकाव्यम् and less in a खण्डकाव्यम् -- all these वर्णन-s are nothing but अर्थवाद-s . परकृति and पुराकल्प can also be applied

in काव्य-s . अलङ्कार-s are also अर्थवाद-s . रामवत् वर्तितव्यं न तु रावणादिवत् ( ध्वन्यालोकः ) - is the विधिवाक्यम् of रामायणम् and so on .

## जातिः -- व्यक्तिः

This is a universal concept, applicable to all languages --

गौः न हन्तव्या ( a cow should not be killed ) -- ' a cow ' means -- all the cows -- the class of cows -- गोजातिः ।

गाम् आनय ( fetch a cow ) -- ' a cow ' means -- a single cow / a cow individual -- गोव्यक्तिः ।

There has been great discussion in शास्त्र-s and दर्शन-s with regard to जाति and व्यक्ति ।

जातिः - सामान्यम् इति अनर्थान्तरम् । आकृतिः इति शब्देनापि जातिः उच्यते । द्रव्यम् - व्यक्तिः - सत्त्वम् इति पर्यायाः ।

सीदन्ति जातिगुणक्रियाः अस्मिन्निति सत्त्वम् -- सदेः औणादिकः त्वप्रत्ययः ।

जातिः can be DNA.

Initially, जातिः - आकृतिः - व्यक्तिः  are taken as three entities -- i e in न्यायदर्शनम्, महाभाष्यम् etc. But later, जाति and आकृति are used as synonyms --

जातिमेवाकृतिं प्राहुः व्यक्तिराक्रियते यया ।

सामान्यं तच्च पिण्डानाम् एकबुद्धिनिबन्धनम् ॥ श्लोकवार्तिकम्, आकृतिवादः, 3

(आकृतिः - क्तिन् , आकारः - घञ् ) -- आक्रियते = निरूप्यते ।

नैयायिकवैशेषिकमीमांसकवैयाकरणानां मते जातिः नित्या ।

Here is a survey that cannot be claimed to be  exhaustive --

1. न्यायदर्शनम् --

जात्याकृतिव्यक्तयस्तु पदार्थः  ( 2-2-67 ) - Here ' पिष्टमयी गौः' - is an example for आकृति। जातिः प्रधानम्  व्यक्तिस्तु  अङ्गम्  - व्यक्तिः प्रधानम्  जातिस्तु अङ्गम् - इत्यादि। नव्यनैयायिकमते'पि जातिविशिष्टव्यक्तिर्वा व्यक्तिविशिष्टजातिर्वा पदार्थः (पदार्थः = शब्दार्थः)।

2. वैशेषिकदर्शनम् --

सामान्यं विशेष इति बुद्ध्यपेक्षम्, भावो'नुवृत्तेरेव हेतुत्वात् सामान्यमेव , द्रव्यत्वं गुणत्वं कर्मत्वं च विशेषाश्च । ( 1-1-3,4,5 )

3. पूर्वमीमांसा --

आकृतिः क्रियार्थत्वात्  ( 1-3-9-33 ) -- सिद्धान्तसूत्रम् ।

आनन्त्यव्यभिचाराभ्यां शक्त्यनेकत्वदोषतः ।

न व्यक्तावाकृतौ तु स्यात् सर्वमेतत्समञ्जसम् ॥

.अन्वयव्यतिरेकाभ्याम्  एकरूपप्रतीतितः ।

आकृतेः प्रथमं ज्ञाने तस्या एवाभिधेयता ।

व्यक्त्याकृत्योरभेदाच्च व्यवहारोपयोगिता ॥

लिङ्गसंख्यादिसंबन्धः सामानाधिकरण्यधीः ।

सर्वोपपन्ना च यतः तस्मात् तत्रैव कल्पयेत् ॥ तन्त्रवार्तिकम्

यत्सत्त्वे यत्सत्त्वम् अन्वयः । यदभावे यदभावः व्यतिरेकः । जातेः एकत्वात् एकवचनमेव ।

जातिः पदर्थः । जातिव्यक्त्योः अभेदात् यागादिक्रियाणां न काचिद्धानिः । व्रीह्यादिव्यक्तयः लक्षणया बोध्यन्ते इति सूत्रभाष्यकारौ । एषां मते जातिरेवाकृतिः -- जातिमेवाकृतिं प्राहुः व्यक्तिराक्रियते यया ।

4. वेदान्तः --

वेदान्तिनां मते जातिः अनित्या – **'**अपागात् अग्नेः अग्नित्वम्**' ( छांदो. उप. 6-4)** इति श्रुतेः। यद्यपि श्रुतावेव **'**तदृषीणाम् ऋषित्वम्**' -** इत्यादयः नैके सन्ति । तथापि सिद्धान्ते इदम् ।

जातिः तेषां मते कश्चन आविद्यको धर्मविशेषः । जातिः उपाधिः इति अनर्थान्तरम् इति हेलाराजः। जीवात्मैव परमात्मा - तस्य शरीरम् तावदुपाधिः । घटाकाशः करकाकाशः इत्यादिषु घटकरकादिकम् उपाधिः। आकाशं तु एकमेव ।

5. बौद्धदर्शनम् --

सर्वं स्वलक्षणम् स्वलक्षणम् ( आर्यसत्यम् ) -- वृक्षः न वृक्षत्वावच्छिन्नः किन्तु इतरेभ्यो वृक्षेभ्यो भिन्नः । ( सर्वं क्षणिकं क्षणिकम् -- आर्यसत्यम् )

6. व्याकरणम् --

जात्याख्यायां एकस्मिन् बहुवचनम् अन्यतरस्याम् (1-2-58) - आकृतिपक्षः ।

सरूपाणाम् एकशेष एकविभक्तौ (1-2-64) - द्रव्यपक्षः ।

In महाभाष्यम्, the dichotomy of जाति and व्यक्ति is discussed in a number of instances. I shall take some and explain --

1. यत्तर्हि तत् भिन्नेष्वभिन्नम् छिन्नेष्वच्छिन्नम् सामान्यभूतं स शब्दः ? (पस्पशाह्निकम् --

जातेः नित्यत्वम् अनेन सूचितम् - वैशेषिकोक्तमपि एतदेव ।

2. द्रव्यं हि नित्यम्, आकृतिरनित्या ( पस्पशा - सिद्धे शब्दार्थ- )

द्रव्यम् = असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं द्रव्यशब्दवाच्यम् । आकृतिः = संस्थानम् ।

3. नित्या आकृतिः ...तदपि नित्यं - यस्मिंस्तत्त्वं न विहन्यते । किं पुनस्तत्त्वम् ? तद्भावस्तत्त्वम् । आकृतावपि तत्त्वं न विहन्यते ( तत्रैव ) ।

लोकव्यवहहाराश्रयेण जातेर्नित्यत्वम् । प्रवाहनित्यता उक्ता अनेन ।

4.सरूपाणाम् एकशेष एकविभक्तौ (1-2-64)

कथं पुनः ज्ञायते? - एका आकृतिः सा चाभिधीयते इति?

(वार्तिकम्) -- प्रख्याविशेषात् ( भा ) नहि गौरित्युक्ते विशेषः प्रख्यायते - शुक्ला नीला कपिला कपोतेति। प्रख्या बुद्धिः तस्या अविशेषः एकरूपता (कैयटः ) । इयमेव अनुगतकारप्रतीतिशब्देन उच्यते (लघुमञ्जूषा)

(वा) धर्मशास्त्रं च तथा । (भा) एवं च कृत्वा धर्मशास्त्रं प्रवृत्तम् - ब्राह्मणो न हन्तव्यः , सुरा न पेया इति । ब्राह्मणमात्रं न हन्यते , सुरामात्रं च न पीयते । नहि आक्रुतिपदार्थकस्य द्रव्यं न पदार्थः , द्रव्यपदार्थकस्य वा आकृतिर्न पदार्थः । उभयोरुभयं पदार्थः । कस्यचित् किञ्चित्प्रधानभूतम् किञ्चिद्गुणभूतम् । आकृतिपदार्थकस्य आकृतिः प्रधानभूता, द्रव्यं गुणभूतम् । द्रव्यपदार्थकस्य द्रव्यं प्रधानभूतम् आक्रुतिः गुणभूता ।

(कैयटः) -- निःसामान्यानि सामान्यानि इति तार्किकदर्शनं न वैयाकरणैः नियोगत आस्थेयम् ।

5.नञ् **(2-2-6)---**

अथवा सर्व एते शब्दा गुणसमुदायेषु वर्तन्ते ब्राह्मणः क्षत्रियो वैश्य इति । तपः श्रुतं च योनिश्चेत्येतद् ब्राह्मणलक्षणम् । तपःश्रुताभ्यां यो हीनः जातिब्राह्मण एव सः ॥

गुणः = धर्मः ।

धर्मशास्त्रेषु उक्तगुणयुक्तः ब्राह्मणः इत्युच्यते - नो चेत् केवलजातिब्राह्मण इति - अर्थात् ब्राह्मणात् ब्राह्मण्यां जन्म - इति - अब्राह्मण इति वदन्ति तेत्र नञ् तेषां गुणानां निवर्तकः । अत्र जातिशब्देन धर्मसमुदायः उच्यते । एतच्च केषाञ्चन मतम् ।

6. भावे **(3-3-18)** - घञ् **----**

भाव एव हि धात्वर्थः इत्यविच्छिन्न आगमः (वाक्यपदीयम्) ।

अत्र भावशब्दस्य जातिरित्यर्थः । सिद्धरूपः। पाकः। क्रिया तु साध्यरूपा ।

7. तस्य भावः त्वतलौ **(5-1-119) ---**

अत्र भावशब्दस्य जातिरर्थः -- गोत्वम् / गोता ।

(वा) सिद्धं तु यस्य गुणस्य भावात् द्रव्ये शब्दनिवेशः तदभिधाने त्वतलौ ।

गुणः = जातिः ।

वाक्यपदीयम् - पदकाण्डः - जातिसमुद्देशः **(33,34 ) ---**

संबन्धिभेदात् सत्तैव भिद्यमाना गवादिषु ।

जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ।

तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते ।

सा नित्या सा महानात्मा तामाहुस्त्वतलादयः ॥

संबन्धिभेदात् = आश्रयभेदात् । त्वतलादयः = त्व-तल्-घञ्-क्तिन्-खल् इत्यादयः ।

8. अतिशायने तमप् **(5-3-55) --**

जननेन या प्राप्यते सा जातिः ।

एतल्लक्षणम् अद्वैतिमते । तेषां ब्रह्मातिरिक्तं सर्वं जन्यमेव ।

## Panini refers to Andhra/Dravida - अवेष्ट्यधिकरणम्

Panini refers to Andhra / Dravida / Dakshinatya -- अवेष्ट्यधिकरणम् -----

यजुर्वेदः - पूर्वमीमांसा - मनुस्मृतिः - व्याकरणम् - वेदान्तः - कल्पः (गृह्यसूत्रम्)

The discussion shows that there were **शिष्ट-s in** दक्षिणदेश ( presently Andhra, Telangana, Tamilnadu, Kerala, Karnataka, Goa) since time immemorial and the वैदिककर्म-s were in vogue ( ईदूतौ च सप्तम्यर्थे पा 1-1-19 , 'तत्रापि सरसी यदि ' वार्तिकम् ; 'अस्ति च लोके सरसीशब्दस्य प्रवृत्तिः, कथम् ? दक्षिणापथे हि महान्ति सरांसि सरस्य इत्युच्यन्ते - महाभाष्यम् ) ।

Panini's योगिप्रत्यक्षम् has got long range influence - enjoy Paninian Morphology laced with philosophy --- now here or nowhere!

पूर्वमीमांसा --

अवेष्ट्यधिकरणम् (पूर्वमीमांसा 2-3-2 ) -- five इष्टि-s are prescribed in राजसूययाग । Following the विधि – 'राजा राजसूयेन यजेत ' - a क्षत्रिय only has got अधिकार and therefore a ब्राह्मण has got no अधिकार in the performance of अवेष्टि -- as such अवेष्टि is not कर्मान्तर ( a different कर्म altogether ) but a गुणविधि (part and parcel of राजसूययाग ) --

अवेष्टौ यज्ञसंयोगात् क्रतुप्रधानमुच्यते -- पू मी 2-3-2-3

पञ्च इष्टयः **( तैत्तिरीयसंहिता 1-8-19 )** ---

1. आग्नेयमष्टाकपालं निर्वपति हिरण्यं दक्षिणा ( अग्निर्देवता अस्य आग्नेयम् – 'सास्य देवता ' 'अग्नेर्ढक्', 'अष्टनः कपाले हविषि ' पा सू दीर्घः )

2. ऐन्द्रमेकादशकपालं ऋषभो दक्षिणा ( इन्द्रो देवता अस्य ऐन्द्रम्) । एकादशेषु कपालेषु संस्कृतम् एकादशकपालम् – 'संस्कृतं भक्षाः' पा सू )

3.वैश्वदेवं चरुं पिशङ्गी पष्ठौ दक्षिणा

4.मैत्रावरुणीमामिक्षां वशा दक्षिणा

5. बार्हस्पत्यं चरुं शितिपृष्ठो दक्षिणा

तत्रैव ब्राह्मणवाक्यानि --

यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधाय आहुतिमाहुतिं हुत्वा अभिघारयेत् , यदि राजन्यः ऐन्द्रम् , यदि वैश्यः वैश्वदेवम् ।

In the above sentences (ब्राह्मणे) - the words 'ब्राह्मण - राजन्य - वैश्य' are निमित्तार्थ or कर्मान्तरविधायक for ब्राह्मण etc.? How? If राजशब्द, by some way or the other, applies to ब्राह्मण etc also then these are निमित्तार्थ - if, by रूढि it applies to क्षत्रियजाति ,then कर्मान्तरप्रापक ।

पूर्वपक्षः -- Here राजशब्द is अयौगिक - people belonging to all three वर्ण-s , while ruling a राज्य , are called राजानः । राज्यम् means ruling villages and towns and कण्टकोद्धरणम् -- anybody doing these things are called राजानः --- claim आर्यावर्तनिवासिनः ।

मनुस्मृतिः --

प्रजानां रक्षणं दानम् इज्याध्ययनमेव च ।

विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः ॥ मनुस्मृतिः **, 1-89**

क्षत्रियस्य परो धर्मः प्रजानामेव सेवनम् ।

निर्दिष्टफलभोक्ता हि राजा धर्मेण युज्यते ॥ मनुस्मृतिः **, 7-144**

Since अभियुक्ताः (Panini) say -- राज्ञः कर्म राज्यम् ( गुणवचनब्राह्मणादिभ्यः कर्मणि च  पा  **5-1-123 ,** ष्यञ्  ) **।** So the one who rules a country  can be called राजा -- just like  the term औदमेघि , अपत्यार्थे  अत  इञ् - suggests his father is उदमेघ  ।

One need not follow this यौगिकार्थ -- **Andhras** use the term राजा in the sense of a जातिक्षत्रिय. That is true - but since आर्यावर्तनिवासिनाम् आचारः प्रमाणम् इति कृत्वा यौगिक एव शब्दः - तस्मात् अवेष्टिः  गुणविधिरेव न तु कर्मान्तरम् ।

सिद्धान्तः --

Earlier, क्षत्रिय got राजसूययाग. ब्राह्मण and  वैश्य  did not get any कर्म. राजशब्दः जातिवाचकः। You said आर्यावर्तनिवासिनः प्रमाणम् इति - तथा स्मृतिनिबद्धप्रयोगाः आन्ध्रा अपि प्रमाणभूताः  --

व्याकरणम् --

'गुणवचनब्राह्मणादिभ्यः कर्मणि च' ष्यञ् - पा 5-1-123 --- अत्र  ब्राह्मणादिगणे  'राजन्'  शब्दः पठ्यते --  आधिराज्यम् ।   (उत्तरत्र असे इति वक्ष्यमाणत्वात् अत्र समासे एव ष्यञ् ) ।

'पत्यन्तपुरोहितादिभ्यो यक्' - पा 5-1-128 -- अत्र पुरोहितादिगणे 'राजासे' इति पठ्यते -- असमासे राजन्शब्दात्  यक् भवतीत्यर्थः - राज्ञः कर्म राज्यम् ।

There is difference of opinion --

Sabarasvamy says - राज्ञः कर्म राज्यम् -- ब्राह्मणादित्वात् ष्यञ् । केचन भाष्यमिदं समर्थयन्ते (न्यायनिर्णय in वेदान्त) । उभयत्र समावेशार्थं पाणिनिना एवं पठितम् इत्याहुः ।

कुमारिल-न्यासकार-हरदत्त-माधव-दीक्षितैः -- पुरोहितादित्वात् यक् इति उक्तम् ।

सिद्धान्ते आन्ध्रदेशे राजन्शब्दस्य  यः प्रयोगः क्षत्रियजातौ  स एवात्र  पुरोहितादिषु  पाणिनिना उपनिबद्धः स एवात्र अवेष्ट्यधिकरणे स्वीक्रियते।

'दृष्टश्चानभिषिक्ते'पि , अपालयति च जनपदं , क्षत्रिये राजशब्दप्रयोगः । तद्वत्यपि वा अन्यजातीये'नभिधानं  द्रविडानाम् ।  तस्मादपि न त्रैवर्णिको राजा । ....दाक्षिणात्यत्वसामान्येन आन्ध्राणामिति भाष्यकारेणोक्तम् ' --  कुमारिलभट्टः  तन्त्रवार्तिके।

वेदान्तः --

There is लिङ्गभूयस्त्वाधिकरणम् **in** ब्रह्मसूत्रशाङ्करभाष्यम् **-- 3-3-29 --** सूत्राणि **44-52 ---**

लिङ्गभूयस्त्वात् तद्धि बलीयस्तदपि - पूर्वविकल्पः प्रकरणात् स्यात् क्रियामानसवत् - अतिदेशाच्च - विद्यैव तु निर्धारणात् - दर्शनाच्च -श्रुत्यादिबलीयस्त्वाच्च - अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववत् दृष्टश्च तदुक्तम् - न सामान्यादप्युपलब्धेः  मृत्युवन्नहि लोकापत्तिः - परेण शब्दस्य ताद्विध्यं भूयस्त्वात्तु अनुबन्धः ।

वैयासिकन्यायमाला --

कर्मशेषाः स्वतन्त्रा वा मनश्चित् प्रमुखाग्नयः ।

कर्मशेषः प्रकरणाल्लिङ्गं त्वन्यार्थदर्शनम् ॥

उन्नेयविधिगाल्लिङ्गादेव श्रुत्या च वाक्यतः ।

बाध्यं प्रकरणं तस्मात् स्वतन्त्रं वह्निचिन्तनम् ॥

शाङ्करभाष्यम् -- 3-3-29-44 --

वाजसनेयके’ग्निरहस्ये --  “नैव वा इदमग्रे सदासीत्” (श ब्रा 10-5-31) इत्येतस्मिन् ब्राह्मणे मनो’धिकृत्य अधीयते - ” तत् षट्त्रिंशत्सहस्राण्यपश्यदात्मनो’ग्नीनर्कान् मनोमयान् मनस्चितः ” इत्यादि । तथैव – “वक्चितः प्राणचितश्चक्षुश्चितः कर्मचितो’ग्निचितः ” इति पृथगग्नीनामनन्ति सांपादिकान् । तत्र संशयः - किमेते मनश्चिदादयः क्रियानुप्रवेशिनः तच्छेषभूता उत स्वतन्त्राः केवलविद्यात्मका इति ।

3-3-29-50 --

.... एवम् अनुबन्धादिभ्यः कारणेभ्यो स्वातन्त्र्यं मनश्चिदादीनाम् , प्रज्ञान्तरपृथक्त्ववत् । यथा प्रज्ञान्तराणि शाण्डिल्यविद्याप्रभृतीनि स्वेन स्वेन अनुबध्यमानानि पृथगेवे कर्मभ्यः प्रज्ञान्तरेभ्यश्च स्वतन्त्राणि भवन्त्येवमिति । दृष्टश्चावेष्टेः रजसूयप्रकरणपठितायाः प्रकरणादुत्कर्षो , वर्णत्रयानुबन्धात्

राजयज्ञत्वाच्च राजसूयस्य। तदुक्तं प्रथमकाण्डे **-- ' क्रत्वर्थायामिति चेन्न वर्षत्रयसंयोगात् ' ( पू मी 11-4-7 )।**

So मनश्चिदादयः स्वतन्त्राः केवलविद्यात्मकाः न तु क्रियानुप्रवेशिनः  अवेष्ट्यधिकरणन्यायेन  - इति सिद्धान्तः ।

Here - under 3-3-29-50, i e अनुबन्धादिभ्यः ..., both भामती **and** न्यायनिर्णयः  have taken up the discussion from second अध्याय  of पूर्वमीमांसा  and discussed  the व्याकरणम् also. Rather भाष्यरत्नप्रभा has taken the material from eleventh अध्याय only. आचार्य  Pullela Sriramacandrudu (with whom I studied a portion of  ब्र सू शां  भा) did not touch the relevant व्याकरणम् in his Telugu Translation.

कल्पः **(**आपस्तम्बगृह्यसूत्रम् **-** मधुपर्कविधिः **--** खं **13** सू **3** ---

एवमुत्तराभ्यां यथालिङ्गं च राजा स्थपतिश्च

सूत्रतात्पर्यदर्शनम् **of** सुदर्शनाचार्य ---

राजा च क्षत्रिय एव , न तु प्रजापालनकर्ता अन्यवर्णोऽपि । ननु क्षत्रिये राजशब्दप्रयोगः आन्ध्राणाम्। आर्याणां तु प्रजापालनादिकर्तर्येव । तत्कथं बलवदार्यप्रयोगबाधेन राजा क्षत्रिय एवेति? मैवम् - आर्यवरस्य भगवतः पाणिनेः गणपाठे 'राजासे' इति विशेषस्मरणस्य आन्ध्रप्रयोगमूलत्वमेव युक्तस्मिति अवेष्ट्यधिकरणे साधितत्वात् ।

## पदम्

**पदम् – Meanings and Definitions**

1.वेदे / वेदान्ते –

पदम् = ब्रह्मन्

सर्वे वेदा यत्पदममनन्ति तपांसि सर्वाणि च यद्वदन्ति ।

यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् ॥ मुण्डकोप **2-15 (**एकश्रुत्या अधीमहे , न तु त्रैस्वर्येण**)**

शांकरभाष्यम् –

यत्पदं पदनीयं गमनीयम् - (तदेतदक्षरं ब्रह्म – मुण्डकोप **2-2** – so both the words, अक्षरं and पदं mean ब्रह्मन् – **Patanjali** at the end of प्रत्याहाराह्निकम् clarifies this – अक्षरम्)

What is this पदनीयम्?

तदेतत् पदनीयम् अस्य सर्वस्य यदयमात्मा अनेन ह्येतत्सर्वं वेद । यथा ह वै पदेन अनुविन्देत् एवं कीर्तिं श्लोकं विन्दते य एवं वेद ....। बृहदारण्यकोप **1-4-7** , **(एकश्रुत्या अधीमहे , न तु त्रैस्वर्येण)**

पदम् = गवादिखुराङ्कितो देशः

शांकरभाष्यम् –

पदनीयम् गमनीयम् । ......कथम् एतत् पदनीयम् इति ? उच्यते – यथा ह वै लोके , पदेन – गवादिखुराङ्कितो देशः पदम् इत्युच्यते , तेन पदेन – नष्टं विवित्सितं पशुं पदेन अन्वेषमाणः अनुविन्देत् – लभेत ; एवम् आत्मनि लब्धे सर्वम् अनुलभते इत्यर्थः ।

How **Samkaracarya** got this meaning – पदम् = गवादिखुराङ्कितो देशः?

From **Panini** –

प्राग्घिताद्यत् (4-4-75) – अधिकारसूत्रम् – पदम् अस्मिन् दृश्यम् (4-4-87) – पद्यः कर्दमः , नातिशुष्क इत्यर्थः ।

वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम् (3-4-32) – णमुल् + ऊलोपः वा – गोष्पदपूरं / गोष्पदप्रं वृष्टो देवः।

2. आयुर्वेदः –

**शब्दो नाम वर्णसमाम्नायः, स चतुर्विधः – चरकसंहिता – विमानस्थानम् – 8-38**

Here the term 'शब्दः' is used in the sense of पदम् (see the commentary of चक्रपाणि )

3. गान्धर्ववेदः –

When a singer takes up a गीति with some राग (सामजवरगमना ...) – it is said 'he took up पदम्' । This is following a usage in वसुचरित्र (one of तेलुगु-पञ्चकाव्यानि) of भट्टुमूर्ति ( who claimed to be सङ्गीतकलारहस्यनिधि) – पदमेत्तन् कलहंसलीलन् ।

4.निरुक्ते **(यास्कीये)** –

There is four-fold division of पद – नामाख्यातोपसर्गनिपाताश्च

सत्त्वप्रधानानि नामानि , क्रियाप्रधानमाख्यातम् , नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति (उपसर्गाः) ,उच्चावचेष्वर्थेषु निपतन्तीति (निपाताः) ।

Some other sages added **कर्मप्रवचनीयाः (कर्म प्रोक्तवन्तः)** to the above four.

5. व्याकरणम् **(पाणिनीयम्) -**

**सुप्तिङन्तं पदम्** (1-4-14) – **सुबन्तम्** and **तिङन्तम् – पदम् द्वेधा** – the rest are covered.

6. न्यायः **(**प्राचीनः) –

ते विभक्त्यन्ताः पदम् ( न्यायसूत्रम् – 2-2-59) – here , सुब्विभक्ति and तिङ्विभक्ति only are taken ( तद्धित is not taken) – ' विभक्तिः द्वयी – नामिकी आख्यायिकी च । ब्राह्मणः, पचति इत्युदाहरणम् ' **–** न्यायभाष्यम् । ( विभक्त्यन्तं च पदम् **–** महाभाष्यम् )

7**.** न्यायः **(** नव्यः **) –**

शब्दशक्तिप्रकाशिका **–** सार्थकशब्दनिरूपणम् – 6 –

शब्दान्तरमपेक्ष्यैव सार्थकः स्वार्थबोधकृत् ।

प्रकृतिः प्रत्ययश्चैव निपातश्चेति सा त्रिधा ॥

पटपाचकाद्याः प्रकृतयः , सुप्तिङाद्याः प्रत्ययाश्चादयो निपाताश्च स्वोपस्थाप्यार्थस्य बोधं नियमतः शब्दान्तरं सहकृत्य जनयन्ति ... ।

यत्तु पाणिनिप्रभृतिभिः प्रातिपदिकं प्रकृतिः इत्युक्तं तदपि नाम्नो नातिरिच्यते (श्लो 13)

.... पदं विभक्त्यन्तम् । पीतपटरूपम् इत्यादावपि न अवान्तरवाक्यार्थबोधपूर्वको महावाक्यार्थबोधः (श्लो15)

तर्कसंग्रहः –

शक्तं पदम् – So a प्रकृति or a प्रत्यय can be a पदम् ।

Although some छाया is available in शब्दशक्तिप्रकाशिका, I do not know as to who offered the above definition first. Nagesa in लघुमञ्जूषा says that following Panini – अपत्यार्थे अण् etc , the Naiyayikas had had the भ्रम ।

Under पाणिनिसूत्रम् **,** दाधाघ्वदाप् (1-1-19) in **Mahabhasyam** there is the following verse –

सर्वे सर्वपदादेशाः दाक्षीपुत्रस्य पाणिनेः ।

एकमात्रविकारे हि नित्यत्वं नोपपद्यते ॥

Right from Bhartrhari , down to Nagesa the term – पद is commented as follows –

पदशब्देन न सुप्तिङन्तं गृह्यते , अपि तु कार्यं प्रतिपद्यमानं प्रकृतिप्रत्ययादि तत्सर्वं पदम् **(**कैयटः). Under ऋलुक् etc also the term पदम् is employed in the sense of प्रकृति / प्रत्यय , in **Mahabhasyam.**

So, this might have prompted Naiyayikas to rule – शक्तं पदम् ।

8. पूर्वमीमांसा

Here is कुमारिलभट्ट **in** तन्त्रवार्तिकम् **,** आकृत्यधिकरणम् **(1-3-33) –**

आकृतिः क्रियार्थत्वात् **(**सिद्धान्तसूत्रम्**)** –

चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः।

क्रियते संशयोत्पत्तेः नोपसर्गनिपातयोः ॥

तयोरर्थाभिधाने हि व्यापारो नैव विद्यते ।

यदर्थद्योतकौ तौ तु वाचकस्स विचार्यते ॥

These verses are quoted by भट्टोजिदीक्षित in शब्दकौस्तुभ ।

चतुर्विधे = नामाख्यातोपसर्गनिपातरूपे ; अत्र = पाणिनीये ; द्विविधस्य = सुबन्तस्य तिङन्तस्य च ; तयोः = उपसर्गनिपातयोः ।

This is बाहुल्यसूचनम् । वाक्यपदीयादिषु वाचकत्वस्यापि निर्णीतत्वात् ।

9. प्रातिशाख्या **–**

नामाख्यातोपसर्गनिपाताः – वाजसनेयप्रातिशाख्या ।

10. ज्योतिषम् **(**सिद्धान्तस्कन्धः) –

चैत्रादितिथिवारेषु करणम् योगकारकम् ।

जन्मनक्षत्रसंयुक्तं तथा त्रिस्थापितं पदम् ॥ निर्णयकौमुदी

In order to compute the कन्दायफलम् one has to find out the पदम् ।

11. वास्तुशास्त्रम् **–**

**पदम्** is plinth area – there is a plot of 300 sq yards – one constructs a house on 200 sq yards of the same and this area is called **पदम् ।**

12. नैघण्टुकाः –

सुप्तिङन्तचयो वाक्यम् (अमरकोशः) – सुबन्तम् and तिङन्तम्.

13.आलङ्कारिकाः –

ध्वनिर्वर्णाः पदं वाक्यम् इत्यास्पदचतुष्टयम् – सरस्वतीकण्ठाभरणम्

तत्र पद्यते अनेन अर्थ इति पदम् । तत् त्रिधा – क्रियारूपम् , कारकरूपम् उपस्कार‌रूपञ्च – शृङ्गारप्रकाशः

**14.** काव्यादिषु **–**

स्फुटता न् पदैरपाकृता (किरातार्जुनीयम् **3-27**) – पदैः सुप्तिङन्तशब्दैः (घण्टापथव्याख्या)

सहसा विदधीत न क्रियाम् अविवेकः परमापदां पदम् **(**किरा**. 3-30**) – आपदां पदं स्थानम् । कारणम् इत्यर्थः (घण्टा.) ।

पदैश्चतुर्भिस्सुकृते स्थिरीकृते (नैषधीयचरितम् **1-7)** – अमुना नलेन चतुर्भिः पदैः चरणैः सत्यास्तेयशमदमरूपैः तपोदानयज्ञज्ञानरूपैर्वा सुकृते धर्मे ...(नारायणः)

This is another list that is not exhaustive. Just a survey.

1. कठोपनिषत् **(2-15)** --

पदनीयं गमनीयम् **--** ब्रह्म

सर्वे वेदा यत्पदमामनन्ति

तपांसि सर्वाणि च यद्वदन्ति ।

यदिच्छन्तो ब्रह्मचर्यं चरन्ति

तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् ॥

शाङ्करभाष्यम् --

.... सर्वे वेदा यत्पदं पदनीयं गमनीयं अविभागेन अविरोधेन आमनन्ति प्रतिपादयन्ति ...। तदेतत् पदं

यद्बुभुत्सितं त्वया तदेतदोमिति ओंशब्दवाच्यम् ओंशब्दप्रतीकं च ।

2. ऋग्वेदः ---

1.चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्तहस्तासो अस्य ।

त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश॥ **4-58-3**

महाभाष्यम् **(**पस्पशाह्निकम् **)** --

चत्वारि शृङ्गाणि - पदजातानि , नामाख्यातोपसर्गनिपाताश्च ।

2.चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।

गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥ **1-164-45**

महाभाष्यम् **(**पस्पशाह्निकम्**)** --

चत्वारि वाक्परिमिता पदानि चत्वारि पदजातानि - नामाख्यातोपसर्गनिपाताश्च ।

3. निरुक्तम् --

तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च 1-1

4.वाजसनेयप्रातिशाख्यम् --

नामाख्यातोपसर्गनिपाताः **8-49**

5. पाणिनीयव्याकरणम् --

सुप्तिङन्तं पदम् **1-4-94** ( सुबन्तम् = नाम ; तिङन्तम् = क्रिया ) ।

6. न्यायदर्शनम् --

ते विभक्त्यन्ताः पदम् सू **2-2-59 (** विभक्त्यन्तं च पदम् **--** महाभाष्यम् **, 2-1-1 ,** समर्थः पदविधिः **)**

7. महाभाष्यम् --

1.सर्वे सर्वपदादेशाः दाक्षीपुत्रस्य पाणिनेः ।

एकदेशविकारे हि नित्यत्वं नोपपद्यते ॥ दाधाघ्वदाप् **, 1-1-20**

पदशब्देन न सुप्तिङन्तं गृह्यते , अपि तु कयँ प्रतिपद्यमानं प्रतीयमानं प्रकृतिप्रत्ययादि तत्सर्वं पदम् -- प्रदीपः ।

2.कल्पितपदसङ्घातभक्तो'सौ नोत्सहते'वयवस्य पदान्ततां विहन्तुमिति विसर्जनीयः प्राप्नोति -- उरण् रपरः **, 1-1-51**

पदशब्देन पद्यते अर्थ अनेन इति प्रत्यय उच्यते -- प्रदीपः ।

8. नव्यन्यायः --

शक्तं पदम् -- तर्कसङ्ग्रहः **,** शब्दपरिच्छेदः । ( शक्तम्= प्रकृतिः प्रत्ययश्च **--** अस्य मूलम् **--** उपर्युक्तमहाभाष्यम् )

9. वाक्यपदीयम् --

वाक्यस्य बुद्धौ नित्यत्वम् अर्थयोगं च लौकिकम् ।

दृष्ट्वा चतुष्ट्वं नास्तीति वार्ताक्षौदुम्बरायणौ ॥ **2-342**

10.ज्योतिषम् --

चैत्रादितिथिवारेषु करणम् योगकारकम् ।

जन्मनक्षत्रसंयुक्तं तथा त्रिस्थापितं पदम् ॥ **(कन्दायफलम्) --** निर्णयकौमुदी

11. वास्तुशास्त्रम् --

यावति स्थले गृहं निर्मीयते तत् स्थलं पदम् ( plinth area) .

12. गान्धर्ववेदः --

गीतस्य गानारम्भे यत् स्वीक्रियते सा ...... इत्यादि तदेव पदम् ।

## कुशः - दर्भः

अस्त्री कुशं कुथो दर्भः पवित्रम् --- अमरः

कौ शेते -- अन्येभ्यो'पि दृश्यते (वा) डः --- कुश्यति ' कुशिर् श्लेषे ' ' इगुपधाज्ञाप्रीकिरः कः पा 3-1-135 -- कः -- कुशः ।

दृभ्यते -- दृभी ग्रन्थे (तुदादिः) -- घञ् ' अकर्तरि च कारके संज्ञायाम् ' पा 3-3-19 , -- दर्भः ।

In most of the cases both these words are used as synonyms.

दर्भः ---

कल्पशास्त्रम् -- गृह्यसूत्रम् -----

दर्भानास्तीर्य ...

औदुम्बरपर्णैः प्रच्छादयति दर्भैर्वा (पात्राणि)

पवित्रं धृत्वादर्भपवित्रपाणिना दर्भानद्भिस्सग्ग् स्तीर्याग्नौ प्रहरति

द्वे दर्भाग्रे द्विरवदाय ..... आब्दिकप्रयोगः ।

कल्पशास्त्रम् -- धर्मसूत्रम् ---

कुशस्थाने च दूर्वास्स्युः मङ्गलस्याभिवृद्धये --- (हेमद्रौ , ब्रह्माण्डे च ) -- निर्णयसिन्धुः - 3

दर्भाः पवित्रं पूर्वाह्णो हविष्याणि च सर्वशः ।

पवित्रं यच्च पूर्वोक्तं विज्ञेया हव्यसंपदः ॥ --- मनुस्मृतिः , 3-256

व्याकरणे -- महाभाष्यम् (वृद्दिरादैच् पा 1-1-1) -

न यथा लोके तथा व्याकरणे । प्रमाणभूत आचार्यः दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म । तत्र अशक्यं वर्णेनाप्यनर्थकेन भवितुम् , किं पुनरियता सूत्रेण ?

कैयटः --- दर्भपवित्रेति । प्रमादाभवं दर्शयति ।

कुशः ---

कुशः रघुवंशे (16) --

अथार्धरात्रे .....कुशः प्रवासस्थकलत्रवेषाम् अदृष्टपूर्वां वनितामपश्यत् ।

रघुवंशे ( 5-4,8 )

अप्यग्रणीर्मन्त्रकृतामृषीणां

कुशाग्रबुद्धे कुशली गुरुस्ते । .......

क्रियानिमित्तेष्वपि वत्सलत्वात्

अभग्नकामा मुनिभिः कुशेषु । ......

शाकुन्तलम् (4-14) ---

यस्य त्वया व्रणविरोपणमिङ्गुदीनां

तैलं न्यषिच्यत मुखे कुशसूचिविद्धे । ....

आयुर्वेदे ( वस्तुगुणदीपिक- Telugu) ---

कुशदर्भगड्डि (the grass of दर्भ ) ---

Poa Cynosuraides ,andropogan Nurdaides (sacrificial grass) -- Skt . कुश , दर्भ , यज्ञभूषण -- either dicoction / powder --

for urinary problems, अश्मरी (stones in gall bladder ), विदाह (too much of thirst), पैत्यम् (bilious nature), problem in abdomen and disease related to श्लेष्म (phlegm) .

वेदः ---

There is, it seems, a mistaken identity --The term कुशा employed in वेद is a संज्ञाशब्द but not a जातिशब्द --

तद्यथा भाल्लविनाम् -- ' कुशा वानस्पत्याः स्थ ता मा पात ' इत्येतस्मिन्निगमे कुशानामविशेषेण वनस्पतियोनित्वेन श्रवणे शाट्यायनिनाम् औदुम्बराः कुशा इति विशेषवचनात् औदुम्बर्यः कुशा आश्रीयन्ते । --- शाङ्करभाष्यम् , ब्र सू 3-3-16

भाष्यरत्नप्रभा --

अत्र ता इति स्त्रीलिङ्गनिर्देशात् औदुम्बर्य इति भाष्याच्च शलाकासु कुशशब्दस्य स्त्रीत्वं मन्तव्यम्, दर्भविषयस्य न स्त्रीत्वं , अस्त्री कुशमित्यनुशासनात् ।

भामती --

.... छन्द एव आच्छन्द आच्छादनादाच्छन्दो भवति ।

न्यायनिर्णयः --

भो कुशाः शङ्कवः , यूयं वानस्पत्या वनस्पतिप्रभवाः स्थ भवथ  मा मां पात रक्षत इति यजमानस्य वचनम् । औदुम्बरा इति श्रुतेः दर्भविषयकुशशब्दस्य अस्त्रीत्वम् । अत एव अस्त्री कुशम् इति अमरसिंहेन अनुशिष्टम् । औदुम्बर्य  इति भाष्यात् कुशशब्दस्य शङ्कुविषयस्य

स्त्रीत्वमपीति विवेक्तव्यम् ।

शब्दकौस्तुभः (जानपद ... पा 4-1-42 )  See also - प्रौढमनोरमा ---

कुशान्या । छन्दोगाः स्तोत्रीयागणनार्थान् औदुम्बरान् शङ्कून् कुशा इति व्यवहरन्ति । अत एव हानौतूपायनेत्युत्तरमीमांसासूत्रे तत्रत्यभाष्यादौ चनिर्दोषतायां सत्यामपि कुशाशब्दः स्त्रीलिङ्गो नास्त्येवेत्यभिप्रायको वाचस्पतिग्रन्थः प्रौढिमात्रपर इत्युक्तं द्वितीये ।

छन्दोद्गाः ...... अतःकृकमीति सूत्रे हानौतूपायनेतिव्याससूत्रे  कुशा वानस्पत्या स्थ ता मा पात इति श्रुतौ च प्रसिद्ध एवायम् । ---  Vacaspatimisra (भामती), in this context, thought that there is no कुशाशब्द in स्त्रीलिङ्ग and misinterpreted the भाष्यम्.

Anyhow, here the term कुशा is a संज्ञाशब्द and not a जातिशब्द (means दर्भ) ।

## वासुदेवः

वासुदेवः / सर्वाधाराधेयः

सन्ध्यावन्दनम् - शिशुपालवधम् - पाणिनीयम् - विष्णुपुराणम् - ऋग्वेदः - यजुर्वेदः

अन्नमाचार्यकीर्तना --

अनन्तचरण सर्वाधाराधेय अनन्तकरदिव्यायुध

अनन्तनिजकळ्याणगुणार्णव अनन्त श्रीवेङ्कटाद्रिनिवास  ॥ ते शरणमहम् ॥

आधारश्च आधेयश्च आधाराधेयम् - सर्वेषाम् आधाराधेयम् यस्मिन् सः सर्वाधाराधेयः - अर्थात् सर्वस्य आधारः आधेयश्च स एव - केवलम् उद्भूतावयवानुद्भू-

तावयवभेदेन व्यवहारः - वृक्षः वनं  इतिवत् ।  द्वन्द्वगर्भबहुव्रीहिः ।

अत्र ‘सर्वो द्वन्द्वो विभाषया एकवद्भवति ’(परिभाषा) इति’ तिष्यपुनर्वस्वोः नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनम् नित्यम् ’ पा **1-2-63** इतिसूत्रे बहुवचनग्रहणेन **(**जातिरप्राणिनाम् पा **2-4-6** इति विकल्प इति **)** सूचितम् ।

Annamacarya, by the term **' सर्वाधाराधेय ' refers to** वासुदेव **only** ----

सन्ध्यावन्दनम् --

वासनाद्वासुदेवस्य वासितं ते जगत्त्रयम् ।

सर्वभूतनिवासो’सि श्रीवासुदेव नमोस्तु ते ॥

शिशुपालवधम् --

श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि ।

वसन् ददर्शावतरन्तमम्बराद्धिरण्यगर्भाङ्गभुवं मुनिं हरिः ॥

जगन्निवासः (श्रियः पतिः=श्रिया सहितः) हरिः वसुदेवसद्मनि वसन् मुनिं ददर्श ( वसन् ददर्श  इति ’ धातुसम्बन्धे प्रत्ययाः’ पा **3-4-1)** ।

पाणिनीयम् ---

'वासुदेवार्जुनाभ्यां वुञ् ’ पा **4-3-98** ---

महाभाष्यम् **--**

संज्ञैषा तत्रभवतः

प्रौढमनोरमा **--**

छाणोरपवादः । .......अत्र भाष्यम् संज्ञैषा तत्रभवत इति । अयं भावः --

सर्वत्रासौ समस्तं च वसत्यत्रैवेति वै यतः । **---- (**स एव आधारः स एव आधेयः**)**

ततो'सौ वासुदेवेति विद्वद्भिः परिगीयते ॥ विष्णुपुराणम् , **2-12**

इति स्मृतेः परमात्मेह वासुदेवः । सर्वत्रासौ वसति अन्तर्यामित्वत् सर्वमत्र वसति वा सर्वस्य ब्रह्मविवर्तत्वात् इति वासुः ।

बाहुलकादुण् । 'कोकः पुराणपुरुषो नलिनेशयश्च वासुर्नरायणपुनर्वसुविश्वरूपाः' इति त्रिकाण्डशेषः। वासुश्चासौ देवश्चेति विग्रहः । तथा च नेयं गोत्राख्या नापि क्षत्रियाख्या । अतो युक्त एव वुञ्विधिः ।

शब्दरत्नः --

ब्रह्मविवर्तत्वादिति । ब्रह्मोपादानकारणकत्वादित्यर्थः । नरायणेति । नरा अयनं स्थानं यस्येत्यर्थः। अन्तर्यामितया तेषु स्पष्टं स्थितेः । अस्मादेव स्वार्थिके अणि नारायणः। नरसमूहार्थकनारशब्देनायं साधुरित्यन्ये । अयं वुञ् is an अपवाद of 'वृद्धाच्छः' and 'ऋष्यन्धकवृष्णिकुरुभ्यश्च ' अण् ;-- अपोद्यते बाध्यते अनेनेति अपवादः - करणे घञ् ।

Here स्मृति means विष्णुपुराणम्**;** the terms अन्तर्यामी **,** विवर्तः **,** उपादानकारणम् are explained in ब्रह्मसूत्रशाङ्करभाष्यम् etc ;

बाहुलकादुण् = कृवापाजिमिस्वदिसाध्यशूभ्य उण् - उणादिः 1-1 ; ' उणादयो बहुलम् ' पा 3-3-1

विष्णुपुराणम् ---

पराशर **preaches** मैत्रेय (1-30,31)--

सो'हं वदाम्यशेषं ते मैत्रेय परिपृच्छते ।

पुराणसंहितां सम्यक् तां निबोध यथातथम् ॥

विष्णोः सकाशादुद्भूतं जगत्तत्रैव च स्थितम् ।

स्थितिसंयमकर्तासौ जगतो'स्य जगच्च सः ॥

The second अध्याय deals more with सांख्यदर्शनम् --

आधारभूतं विश्वस्याप्यणीयांसमणीयसाम् ।

प्रणम्य सर्वभूतस्थम् अच्युतं पुरुषोत्तमम् ॥ 2-5

वेदवादविदो विद्वन्नियता ब्रह्मवादिनः ।

पठन्ति चैतमेवर्थं प्रधानप्रतिपादकम् ॥ 2-22

We can quote hundreds of verses from विष्णुपुराणम् ।

ऋग्वेदः **(1-164-41-46) --**

इन्द्रं मित्रं वरुणमाहुः अथो दिव्यः स सुपर्णो गरुत्मान् ।

एकं सद्विप्रा बहुधा वदन्ति अग्निं यमं मातरिश्वानमाहुः ॥

यजुर्वेदः -- काठकेषु - तुभ्यं ता -- **46, 47 ----**

यावतीस्तारकास्सर्वाः । वितता रोचने दिवि । सर्वास्ताः । ऋचो यजूंषि सामानि । 46 अथर्वाङ्गिरसश्च ये । सर्वास्ताः । इतिहासपुराणञ्च । सर्पदेवजनाश्च ये।

सर्वास्ताः । ये च लोका ये चालोकाः । अन्तर्भूतं प्रतिष्ठितम् । सर्वास्ताः । यच्च ब्रह्म यच्चाब्रह्म । अन्तर्ब्रह्म प्रतिष्ठितम् । 47

The fact is that the famous वाग्गेयकाराः, like Tyagaraja, Annamacarya etc, have digested the वेद-s , उपनिषत्-s etc and composed कृति-s for the benefit of common people, who find it difficult to reach out to seminal works.

## ओम्

**Chanting of ओम् by women:**

Are you born in भारतम् (extended आर्यावर्त)? Then do you perform the regular पूजा? In the संकल्प (beginning) do you do आचमनम्? Whether you are married or not, the following is the way of आचमनम् -- for that matter, if you are married, in any वैदिक्कर्म (पूजा etc) the पुरोहित , after conducting अचमनम् by your husband , would ask you to follow (if both of you are doing on your own also you do in the order of husband and wife ) --

ओम् केशवाय नमः , ओम् नारायणाय नमः , ओम् माधवाय नमः , गोविन्दाय नमः (or गोविन्द , विष्णो etc) - this is for ladies.

ओम् केशवाय स्वाहा , ओम् नारायणाय स्वाहा , ओम् माधवाय स्वाहा .... this is for gents .

ओम् केशव , ओम् नारायण , ओम् माधव ... this is for ladies who lost their husband.

Now, as things stand , what is the real question ?

On the other hand, did you (or your relatives / friends ) anywhere -- in any authentical source - notice anything that madeyou put such a question ? - we can discuss? May be you want to help many people to know the fundamentals of सनातनधर्म / शिष्टाचार ।

आचारहीनं न पुनन्ति वेदाः -- वसिष्ठस्मृतिः

This is a good question --

Among the six वेदाङ्ग-s there is one called कल्पशास्त्रम् - which tells the प्रयोग (practical part) of वेदमन्त्र-s. It has got four wings and one of them is गृह्यसूत्रम् - which deals with जातकर्म - उपनयनम् - विवाहः - अपरम् etc.

गृहम् = भार्या

गृहनिमित्तः अग्निः गृह्यः तत्रभवानि कर्माण्यपि लक्षणया गृह्याणीत्युच्यन्ते । गृहशब्दो भार्यायां शालायां च वर्तते - सगृहो गृहमागतः ....' भार्यादिरग्निः जायादिर्वा तस्मिन् गृह्याणि ' इति गौतमः । --- गार्ग्यनारायणः , आश्वलायनगृह्यसूत्रम् , 1-1-1

न गृहं गृहमित्याहुः गृहिणी गृहमुच्यते -- शान्तिपर्व , महाभारतम् -- 144-66

So, for almost all कर्म-s गृहिणी / भार्या / जाया is a must and there she has to do आचमनम्. ओमभ्यादाने (पा 8-2-87) - at the beginning of वेद - ओम् should be pronounced as प्लुत -- ओ३म् ।

पुरा कल्पेषु नारीणाम् मौञ्जीबन्धनमिष्यते ।

अध्यापनं च वेदानां सावित्रीवचनं तथा ॥

My father taught गणेशपूजा , श्रीसूक्तम् etc to my sisters - I taught गणेशपूजा , पुण्याहवाचनम् , मन्त्रपुष्पम् to my daughter along with my son (during the lock down my दौहित्र ( daughter's son ) completed पुरुषसूक्तम् and learning श्रीसूक्तम् along with व्याकरणम् and ज्योतिषम् ।

We have to decide as to whether to train our girls and boys in वेद and शास्त्र or leave them to पुरोहित-s who recite -- लक्ष्मीर्मे नश्यताम् त्वाम् वृणे (श्रीसूक्तम्) instead of अलक्ष्मीर्मे ....

Bonus Info ---

ओम् --

अवति = रक्षति इति ओम् ( अव्ययम् - स्वरादिः ) - ' ओङ्कारप्रणवौ समौ ' - अमरः -- ' ओमित्येकाक्षरं ब्रह्म '-- नारायणोपनिषत् ।

ओम् = okay - अनुमतौ -- 'ओम्प्रश्ने"ङ्गीकृतौ रोषे ' - विश्वः -- ' ओमित्युक्तवतो'थ ' -- शिशुपालवधम् , 1-75

' अवतेर्मन्प्रत्यये तस्य टिलोपे ओम् इति दर्शनात् ' -- सिद्धान्तकौमुदी , यङ्लुक् प्रकरणम् - ज्वरत्वर ...। (in the Balamanorama Series under the above सूत्रम् - अवतेः मनिन् प्रत्यये - is seen - it should be मन् प्रत्यये )

अव = रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालि“ङ्गनहिंसादानभागवृद्धिषु -- भ्वादिः - अवति

अवतेष्टिलोपश्च (उणादिः 1-139 ) - इति मन् प्रत्ययः तस्यैव टिलोपः - अव म् --- ' ज्वरत्वरस्रिव्यविमवामुपधायाश्च ( पा 6-4-20) इति अव इत्यस्य ऊठ् ( द्वयोरपि स्थाने एकः ऊठ् अथवा द्वौ ऊठौ सवर्णदीर्घः - द्वावपि पक्षौ ' एकः पूर्वपरयोः' 6-1-81 इत्यत्र भाष्ये ) -- ऊ म् - गुणः -- ओम् ।

चादिपाठात् अव्ययत्वम् इति उज्ज्वलदत्तः - तन्न - ' चादयो'सत्त्वे ' (पा 1-4-57) - ओम् इत्यस्य ब्रह्म अर्थः -- ' ओमित्येकाक्षरं ब्रह्म ' - नारायणोपनिषत् ।

ब्रह्म च द्रव्यम् - तस्मात् ’स्वरादिनिपातमव्ययम् ’ (पा 1-1-36) इति ओमित्यस्य अव्ययत्वम्।

ओमित्येकाक्षरं ब्रह्म -- ओमित्यक्षरमेव ब्रह्मेति तादात्म्यसंबन्धः - ’ भेदसहिष्णुः अभेदः तादात्म्यम् ’ - ओङ्कारवाच्यं ब्रह्मेत्यर्थः -- ’ तस्य वाचकः प्रणवः ’ इति योगसूत्रम् ।

’वृद्धिरादैच् ’ (पा सू ) , ’ अमरा निर्जरा देवाः ’ इत्याद्यपि एवमेव । स्पष्टं चेदं लघुमञ्जूषायां शक्तिवादे । In fact this is universal – ‘he is Rama ' -- he is not Rama , rather his name is Rama - or - he is denoted by the name Rama .

Bauddhas also use ओङ्कार । They are , in fact , पाषण्ड-s = वेदबाह्याः --

पान्ति रक्षन्ति इति पाः वेदाः ( पा रक्षणे , क्विप् ) तान् खण्डयति इति पाखण्डः - स एव पाषण्डः - पृषोदरादिः ।

अधर्म is so rampant - so wait and see --

अतिक्रान्तसुखाः कालाः प्रत्युपस्थितदारुणाः ।

श्वः श्वः पापीयदिवसाः पृथिवी गतयौवना ॥ (व्यासः)

I do not advocate वेदाध्ययनम् to ladies - rather - since there are no good पुरोहित-s and even those who are available are not trained in शिक्षा and व्याकरणम् - are mispronouncing -- it is better to teach some मन्त्र-s to girls so that they can perform नित्यपूजा / गणपतिपूजा etc . - do some प्रायश्चित्तम् with पुण्याहवाचनम्.

One has to apply श्रुति / स्मृति to the present social conditions -- boys are not embracing पौरोहित्यम् because no girl is coming forward to marry him -- there are dozens of young पुरोहित-s across Andhra - Telangana – Karnataka. To fill the gap lady पुरोहिता-s have already entered the field in Maharastra and Telangana .

शिक्षा and व्यारणम् (महाभाष्यम् - पस्पशाह्निकम् ) clearly say - दुष्टः शब्दः स्वरतो वर्णतो वा ... स वाग्वज्रो यजमानं हिनस्ति -- I do not think any sane person would engage a पुरोहित who recites - लक्ष्मीर्मे नश्यतां ....? Once it is recited no one can do anything. Is it your सिद्धान्त that one may allow a पुरोहित to do maximum damage rather than allow a girl to learn a minimum portion of वेद that is useful just for पूजा and प्रायश्चित्तम् ? Not for वेदरक्षा / अध्ययनम् / अध्यापनम् ।

The other day a Vedic scholar from northern India did a very bad recitation at the White House .

परमतम् अप्रतिषिद्धम् अनुमतम् भवति -- उत्तरतन्त्रम् - सुश्रुतसंहिता ।

Why nobody is doing anything? I am contemplating to do something soon.

And what about आपद्धर्म ? --- उद्योगपर्व of महाभारतम्,

Take a look at this --

वेदो’खिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।

आचारश्चैव साधूनाम् आत्मनस्तुष्टिरेव च ॥  मनु .

My father refused to do a job - teaching वेद in Srisailam  in 1960 for Rs 500/ - because मनुस्मृति says -- न श्ववृत्तिः कदाचन । Today how many of us are ready to give up jobs ? -- तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात् (तैत्तिरीयोप.)

कुसीदं च (गौतमस्मृतिः)- a ब्राह्मण can live by giving money for interest .

Patanjali, under नञ् (पा 2-2-6) - says - no ब्राह्मण is a complete ब्राह्मण --

अब्राह्मणम् आनय इत्युक्ते ब्राह्मणमात्रस्य आनयनं प्राप्नोति ।

About the निषेध ---

If we plough across the 5 वेद-s there is one reference in कृष्णयजुर्वेद -- तैत्तिरीयारण्यकम् - 2 , called स्वाध्यायब्राह्मणम् --

यज्ञोपवीत्येवाधीयीत (1) -- यज्ञोपवीती एव अधीयीत  - the one with यज्ञोपवीतम् only should do वेदाध्ययनम् ।

So , as per the पूर्वमीमांसा that is available today, both ladies and शूद्र-s are not eligible.

If you take another मीमांसा --

काशकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी , तामधीते काशकृत्स्ना ब्राह्मणी -- महाभाष्यम् , ' एको गोत्रे ' पा 4-1-93, ladies are eligible for वेदाध्ययनम् ।

So , here in the above वैदिकवाक्यम्  - यज्ञोपवीती ... the लिङ्गम्  is अविवक्षितम् – यज्ञोपवीतिनी. This applies even to ' स्वाध्यायो' ध्येतव्यः ' - स्वाध्यायब्राह्मणम्  -- मीमांसा -- 6-1-7 अधि. । This aspect  is discussed in ग्रहाधिकरणम् of पूर्वमीमांसा।

It is there even in पू मी  6-1-6-24 - तस्या यावदुक्तमाशीः ....।

If you want मन्त्रोच्चारणम् by ladies -- it is there in वेद itself --पूर्वमीमांसा - 10-4-5 --- महाव्रते पत्न्युपगानेन ऋत्विगुपगानस्य् समुच्चयाधिकरणम् ---

दिक्षु दुन्दुभयो नदन्ति .... पत्नय उपगायन्ति ।

व्याकरणम् – 'तस्य अपत्यम् ' पा सू --- लिङ्गम् अविवक्षितम् -- तस्याः अपत्यम्  ( विनताया अपत्यम् वैनतेयः )

मीमांसा --- पशुना यजेत -- लिङ्गम् विवक्षितम्  -- पुरुषपशुना एव यजेत न तु स्त्रीपशुना ।

पराशरमाधवीयम् ---

अश्वालंभं गवालंभं संन्यासं पलपैतृकम् ।

देवराच्च सुतोत्पत्तिः कलौ पञ्च विवर्जयेत् ॥

शङ्करभगवत्पादाः --

यावत् वर्णाश्रमधर्माः तावत् संन्यासम् ।

श्रिया हैवाभिषिच्यते सर्वे वेदाः प्रणवादिकास्तं प्रणवं तत्साम्नोऽङ्गं वेद स त्रीँल्लोकाञ्जयति चतुर्विंशत्यक्षरा महालक्ष्मीर्यजुस्तत्साम्नोऽङ्गं वेद स आयुर्यशःकीर्तिज्ञानैश्वर्यवान्भवति तस्मादिदं साङ्गं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्राय नेच्छन्ति द्वात्रिंशदक्षरं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति सावित्रीं लक्ष्मीं यजुः प्रणवं यदि जानीयात्स्त्रीशूद्रः स मृतोऽधो गच्छति तस्मात्सर्वदा नाऽऽचष्टे

---

विधत्ते। श्रिया हैवाभिषिच्यत इत्यङ्गेषु सर्वत्र फलश्रवणम्। "द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्यात्" [पू० मी० सू० ४–३–१] इत्यर्थवादः। अनतिधृष्टं स्तृणोति प्रजयैवैनं पशुभिरनतिधृष्टं करोतीति न्यायेन गुणफलाधिकारो वा। सर्वे वेदाः प्रणवादिकास्तं प्रणवमिति सर्वे वेदा उपवेदाश्चाष्टाविंशत्संख्यानन्तरं तत्स्थाने हृदयाङ्गस्थाने प्रणवं विदधत्सर्ववेदादिभूतात्प्रणवात्सामाक्षराण्यधिकतराणीति दर्शयति। तत्साम्नोऽङ्गं वेद स त्रीँल्लोकाञ्जयतीत्युक्तार्थम्। चतुर्विंशत्यक्षरा महालक्ष्मीर्यजुस्तस्मिंश्चतुर्विंशत्यक्षरस्थाने सामतृतीयपादादुपरिष्टात्साम्नोऽङ्गं वेद शिखाङ्गस्थान इत्यर्थः। स आयुर्यशो ज्ञातिप्रशंसा वा कीर्तिर्जनप्रशंसा वा ज्ञानैश्वर्यवान्भवतीत्युक्तार्थम्। यस्मादेवं सामाङ्गफलं तस्मादिदं साङ्गं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छतीत्युक्तार्थम्। सावित्र्यादिमन्त्राणां हृदयाद्यङ्गस्थाने प्राप्तानामत्राऽऽदावेवाङ्गत्वविधानार्थमपकर्षस्तूत्क्रमोपसंहाराभ्यां विधेयत्वे तात्पर्यं दर्शयति। सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्राय स्त्री च शूद्रश्च स्त्रीशूद्रं तस्मै स्त्रीशूद्राय नेच्छन्तीति निषेधं कुर्वन्प्रधानोपासनायां स्त्रीशूद्रस्याप्यधिकारं दर्शयति। द्वात्रिंशदक्षरं साम जानीयादिति द्वात्रिंशदक्षराणां सामसंबन्धं विधत्ते। यो जानीत इत्याद्युक्तार्थम्। सावित्रीं

यथाचष्टे स आचार्यस्तेनैव मृतोऽधो गच्छति ॥ ३ ॥ स होवाच प्रजापतिरग्निर्वै वेदा इदं सर्वं विश्वानि भूतानि प्राणा वा इन्द्रियाणि पशवोऽन्नममृतं सम्राट्स्वराड्विराट्तत्साम्नः प्रथमं पादं जानीयादृग्यजुःसामाथर्वरूपः सूर्योऽन्तरादित्ये हिरण्मयः पुरुषस्तत्साम्नो द्वितीयं पादं जानीयाद्य ओषधीनां प्रभवति तारापतिः सोमस्तत्साम्नस्तृतीयं पादं जानीयात्स ब्रह्मा स शिवः स हरिः स इन्द्रः सोऽग्निः सोऽक्षरः परमः स्वराट्तत्साम्नश्चतुर्थं पादं

---

नाऽऽचष्ट इत्याचार्यस्य निषेधं दर्शयति । यथाचष्टे स आचार्यस्तेनैव कथनेन मृतोऽधो गच्छतीति प्रत्यवायदर्शनेन निषेधमेव द्रढयतीति ॥ ३ ॥

एवं सामाङ्गान्युक्त्वा तदुपासनायां च स्त्रीशूद्रव्यतिरिक्तमधिकारिणमुक्त्वाऽन्त्यप्रश्नाङ्गदेवतानि वक्तुं सामदेवतैव तत्तत्स्थाने निपतितस्याङ्गस्य सैव देवतेति स प्रजापतिर्ह हर्षितोऽन्त्यप्रश्न उत्तरमुवाच—अग्निर्वै वेदा इदं सर्वमित्यादि यो जानीते सोऽमृतत्वं च गच्छतीत्यन्तं च ससागरामित्यादिना योजनीयम् । एतदुक्तं भवति । क्षीरोदार्णवशायिन्युपविष्टे वा न्यस्तस्य साङ्गस्य साम्नः पादश्च उक्तगुणां पृथ्वीं हृदयान्तर्वर्तित्वेनाग्निर्वै वेदा इदं सर्वं विश्वानि भूतानि प्राणा इन्द्रियाणि पशवोऽन्नममृतं सम्राट्स्वराड्विराट्तत्साम्नः प्रथमपादस्य तदङ्गस्य प्रणवस्य हृदयमन्त्रस्य च दैवतं जानीयादिति पारमेश्वरं हृदयं व्याख्यातम् । तथा यक्षगन्धर्वादिगुणविशिष्टमन्तरिक्षं शिरोन्तर्वर्तित्वेन सर्ववेदमयः सूर्यो हिरण्मयः पुरुषस्तत्साम्नो द्वितीयपादस्य शिरोमन्त्रस्य च तदङ्गस्य सावित्रमन्त्रस्य च दैवतमिति पारमेश्वरं शिरो व्याख्यातम् । तथा च वसुरुद्रादित्यैः सेवितं द्युलोकं शिखान्तर्वर्तित्वेन य ओषधीनां प्रभवति तारापतिश्चन्द्रमास्तत्साम्नस्तृतीयपादस्य शिखामन्त्रस्य च लक्ष्मीयजुषश्च दैवतमिति पारमेश्वरं शिखाङ्गं व्याख्यातम् । तथा च ब्रह्मलोककवचान्तर्वर्तित्वेन स ब्रह्मेत्यादिमन्त्रवर्णात्तत्साम्नश्चतुर्थपादस्य च तदङ्गभूताया नृसिंहगायत्र्याश्च कवचमन्त्रस्य च दैवतमिति पा-

# योग्यता – आरोपितः

व्याकरणम् - वेदान्तः - योगः - न्यायः - वैशेषिकम् - वेदः - अलङ्कारशास्त्रम् - ज्योतिषम्

योग्यता ---

'पदार्थाष्टकविचारपरत्वत् वाक्यपदीयस्य ' ( वाक्यपदीयम् discusses eight issues ) -- declares Helaraja at the beginning of पदकाण्ड of वाक्यपदीयम् --

they are enumerated by Hari (ब्रह्मकाण्डः **- 24,25,26**) ---

अपोद्धारपदार्था ये ये चार्थाः स्थितलक्षणाः ।

अन्वाख्येयाश्च ये शब्दा ये चापि प्रतिपादकाः ॥

कार्यकारणभावेन योग्यभावेन च स्थिताः ।

धर्मे च प्रत्यये चाङ्गं संबन्धाः साध्वसाधुषु ।।

ते लिङ्गैश्च स्वशब्दैश्च शस्त्रे'स्मिन्नुपवर्णिताः।

स्मृत्यर्थमनुगम्यन्ते केचिदेव यथागमम् ॥

1.शब्दः -- 1. प्रकृतिप्रत्ययौ 2. पदवाक्ये

2.अर्थः -- 1. प्रकृतिप्रत्ययार्थौ 2.पदवाक्यार्थौ

**3.**शब्दार्थसंबन्धः **-- 1.** कार्यकारणभावः

**2.**योग्यता

4.प्रयोजनम् -- 1. अर्थज्ञानम् 2. धर्मः

कार्यकारणभावः --

शब्द is कारणम् -- अर्थ is कार्यम् --- अर्थ is कारणम् -- शब्द is कार्यम् ( think about it - it is not difficult to understand - I shall clarify if needed) .

शब्दः कारणमर्थस्य स हि तेनोपजन्यते ।

तथा च बुद्धिविषयात् अर्थात् शब्दः प्रतीयते ॥ वा प . पदकाण्डः , सम्बन्धसमुद्देशः **- 32**

योग्यता **--** समयः ---

let us take some examples --

in the first place it is विद्या and then अविद्या

शब्दः -- अपशब्दः

अभेदः -- भेदः

योग्यता -- समयः (सङ्केतः)

In the beginning it is विद्या only, but later comes अविद्या (विद्यावस्था अभिन्नब्रह्मात्मिका -- तथा साधुशब्दावस्था विद्या ---

(साधु-) शब्दाः are there and latter अपशब्दाः have emerged.

अभेद is there and later भेद --

गौः is the शब्द - the same is अर्थ (and the same is ज्ञानम् ) --

शब्दार्थप्रत्ययानाम् इतरेतराध्यासात् सङ्करः तत्प्रविभागसंयमात् सर्वभूतरुतज्ञानम् ( योगसूत्रम्**, 3-17** , how to understand the languages of birds and animals ...).

With regard to शब्द , there will be both types of प्रयोग in वेद **-** शास्त्र **-** निघण्टु **and** लोक ---

ओमित्येकाक्षरं ब्रह्म (नारायणीयोपनिषत्) -- तस्य वाचकः प्रणवः (योगसूत्रम्)

वृद्धिरादैच् (पा सू **1-1-1)** -- आदैचः वृद्धिशब्दवाच्याः

अमरा निर्जरा देवाः (अमरकोशः) -- अमरनिर्जरदेवशब्दाः पर्यायाः

अयं रामः -- अयं रामशब्दवाच्यः (this is Rama -- this person is denoted by the शब्द् – 'Rama' .

(Take a family -- later there will be families. World is one - then divided into continents--countries--states and so on).

योग्यता --

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा ।

अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा ॥ वा प , प कां **, 29**

सम्बन्धशब्दे संबन्धो  योग्यतां प्रति योग्यता ।

समयात् योग्यतासंवित् मातापुत्रादियोगवत् ॥ **........31**

As soon as a शब्द is pronounced an अर्थ is understood - without any effort - this is a natural शक्ति (capacity) of शब्द - it is called योग्यता (highly technical) and has been there since time immemorial (अनादिः) - and such a शक्ति is akin to the शक्ति (योग्यता) of sense organs in perceiving / comprehending relevant things.

The term संबन्ध denotes संबन्ध , i e योग्यता , through योग्यता only -- the term समवाय also denotes its meaning through योग्यता and even the term योग्यता. The relation between a mother and son is decided through अनादिसिद्धसंबन्ध but not through समय.

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ( वा प , ब्र कां **1) -- this is taken from** शान्तिपर्व **-** महाभारतम् ।

अनादिमव्यवच्छिन्नां श्रुतिमाहुरकर्तृकाम् (वा प , ब्र कां **- 145**)

There are six अनादि**-s in** अद्वैतवेदान्त ।

समयः / सङ्केतः --

अस्य शब्दस्य अयम्  वाचकः - इति प्रतिज्ञा  ---

अनागमश्च सो'भ्यासः समयः कैश्चिदिष्यते ( वा प , वाक्यकाण्डः **- 118 )**

सामयिकः शब्दादर्थप्रत्ययः (वैशेषिकदर्शनम् **, 7-2-20** )

न, सामयिकत्वात् शब्दार्थसंप्रत्ययस्य ( न्यायसूत्रम् **, 2-1-55**)

सङ्केतितः चतुर्भेदः जात्यादिर्जातिरेव वा (काव्यप्रकाशः )

So, initially it is योग्यता - and later comes समय / सङ्केत.

In ज्योतिषम् , we have to check the योग्यता (compatibility) between the horoscopes of bride and groom

आरोपित (superimposed) means thinking / taking something as something else -- रज्जुसर्पभ्रान्तिः ।

The example from ज्योतिषम् is to clarify that the योग्यता elsewhere is different from what we are discussing – even the योग्यता (a prerequisite of a sentence) -- चैत्रः अग्निना सिञ्चति -- is quite different.

The योग्यता under discussion, is highly technical and used only in पाणिनिदर्शनम्, at top level (please note वाक्यपदीयम् is a commentary on महाभाष्यम् - so it is not easy to understand the former without deep understanding of the latter).

Helaraja explains --

समवायादिनिमित्तानपेक्षयैव उच्चरिमात्रात् शब्दात् अर्थप्रत्ययोत्पतेः अकृत्रिमा शक्तिरवसीयते । अर्थमात्रेण हि शब्दमात्रस्य अवियोगम्

अप्रवृत्तसङ्केता अपि प्रतिपद्यन्ते । तथा च योग्यता स्वाभाविकी सिद्धा , सङ्केतस्तु तामेव द्योतयति । तद्यथा चक्षुरादीनां रूपादिविषये पुरुषप्रयत्नानपेक्षा ग्राहकता ।

There are two things --

शब्द denotes अर्थ through a natural capacity called योग्यता and this is akin to the natural capacity of sense organs which grasp the things/objects concerned.

**Both, शब्द and इन्द्रिय, have this capacity since time immemorial – अनादि.**

The योग्यता is not आरोपित (superimposed) by anyone.

Now come to the second stage --

there is one thing called सङ्केत / समय --- the word घटः denotes the meaning घट due to योग्यता -- when a boy is named घट (this is from अम्बाकर्त्री , a commentary by Vid रघुनाथशर्मा - so you can have घटः पश्यति - here only) -- the father means - ’ here after my son should be known by the name घट ’-- this is called स‘ङ्केत / समय.

This सङ्केत / समय is द्योतक -- it is so called because the घटशब्द here is not denoting the original meaning but a different meaning (पुत्रः) due to आरोप.

So योग्यता is the base of other artificial संबन्ध-s such as समय-सङ्केत-समवाय etc.

# युष्मत् - अस्मत् --- पाणिनिः शङ्कराचार्यश्च

पाणिनिः ---

युष्मद्युपपदे समानाधिकरणे मध्यमः (1-4-105)

अस्मद्युत्तमः (1-4-107)

शेषे प्रथमः (1-4-108)

ब्रह्मसूत्रशाङ्करभाष्यम्  **(प्रारंभः)** --

युष्मदस्मत्प्रत्ययगोचरयोः विषयविषयिणोः तमःप्रकाशवत् विरुद्धस्वभावयोः इतरेतरभावानुपपत्तौ सिद्धायां तद्धर्माणामपि सुतराम् इतरेतरभावानुपपत्तिः इत्यतः अस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्माणां च अध्यासःतद्विपर्ययेण विषयिणः तद्धर्माणां च विषये अध्यासो मिथ्येति भवितुं युक्तम् .......।

What is the meaning of the पाणिनिसूत्रम् -- युष्मद्युपपदे ... and अस्मद्युत्तमः?

प्रत्यक्ता (the धर्म of जीवात्मा) and परभाव are उपाधिs of कर्ता and कर्म. उत्तमपुरुष and मध्यमपुरुष (पाणिनि does not use 'पुरुष’) , when उपलक्षित by  अस्मत् and युष्मत् ,  would denote प्रत्यक्ता and परभाव ।

In examples like अहं पचामि, the पचानादिक्रिया expressed by the आख्यातम् , ’ पचामि’, will be अहङ्कारसमानाश्रय , i.e., the क्रिया is connected with the thing that is being denoted by 'अहम्’. If it is प्रत्यक्ता then उत्तमपुरुष, whereas if it is परत्वम् then मध्यमपुरुष. In other words, if it is 'self' (अहंकारसामानाधिकरण्यम्) that appears either as कर्ता or कर्म then उत्तमपुरुष. If it is 'पर’/other person (परभावसामानाधिकरण्यम् ) then मध्यमपुरुष.

प्रत्यक्ता परभावश्चाप्युपाधी कर्तृकर्मणोः ।

तयोः श्रुतिविशेषेण वचकौ मध्यमोत्तमौ ॥ - वाक्यपदीयम् , पदकाण्डः , पुरुषसमुद्देशः , 1

It means that since अहंकार and परभाव are associated with चेतनs (living things), उत्तमपुरुष and मध्यमपुरुष are not applicable in the case of अचेतनs. Then what about usages like शृणोत ग्रावाणः (कृष्णयजुर्वेदः) - ग्रावाणः are अचेतनs ?

सदसद्वापि चैतन्यम् एताभ्यामेव गम्यते ।

चैतन्यभागे प्रथमः पुरुषो न तु वर्तते ॥   तदेव , 2

The चैतन्यम्, real or superimposed (ग्रावाणः), can be denoted by उत्तमपुरुष and मध्यमपुरुष only. प्रथमपुरुष will not be there in चैतन्यम्.

Some scholars hold that in all the places of मध्यमपुरुष it is संबोधनार्थ only. Also, all the forms of युष्मच्छब्दप्रथमाविभक्ति denote संबोधनम् only --

संबोधनार्थः सर्वत्र मध्यमे कैश्चिदिष्यते ।

तथा संबोधने सर्वां प्रथमां युष्मदो विदुः ॥ तदेव 4

भवच्छब्द cannot be used in संबोधनम् and also it has got लिङ्गम् (अलिङ्गे युष्मदस्मदी) and as such it cannot be a substitute to युष्मच्छब्द and hence cannot get मध्यमपुरुष --

तदेवं भवच्छब्दस्य असंबोधनविषयत्वात् लिङ्गवत्त्वाच्च अयुष्मदर्थत्वात् मध्यमो न भवतीति स्थितम् **--** पदमञ्जरी **, 1-4-105**

Then how come Samkaracarya used the term युष्मद् in the sense of जड and अस्मद् in the sense of चेतनम् - युषदस्मत्प्रत्ययगोचरयोः ...?

Here is Nagesa in लघुमञ्जूषा (प्रातिपदिकार्थविचारः P ११६५- चौखाम्बा) --

तस्मात् प्रयोक्तुः अहंकारानास्पदत्वेन युष्मदः शक्तिः। स्पष्टं चेदं पुरुषसमुद्देशे हरिग्रन्थे इत्याहुः।

नन्वेवं सति ‘युष्मदस्मत्प्रत्ययगोचरयोः विषयविषयिणोः तमःप्रकाशवत् विरुद्धस्वभावयोः ’ इति शांकरभाष्यानुपपत्तिः । तद्भाष्याद्धि युष्मदो जडे शक्तिः अस्मदश्चेतने इति स्पष्टं तद्विदाम् । तव तूभयोरपि चेतने शक्तत्वेन तदसंगतिरिति चेन्न । तत्वज्ञशक्त्या तथोक्तेरित्याहुः ।

इदमस्तु सन्निकृष्टे etc has got its roots in महाभाष्यम् under तस्येदम् (4-3-120). There is difference of opinion with regard to -- भवान् – भवन्.

भवच्छब्दस्य मध्यमपुरुषे प्रयोगः

There is ‘भवतु’ in  सर्वादिगण -- under उगिदचां सर्वनामस्थाने’धातोः 7-1-70 --

काशिका says -- डवतु - भवान्  (it is भातेर्डवतुः , 1-65 उणादिः , भातीति भवान्).

न्यास **and** पदमंजरी **accept and** कौमुदी ( अत्वसन्तस्य चाधातोः 6-4-14) follows .

उगितश्च 4-1-6 - प्रौढमनोरमा --

भवतीति । सर्वादिषु भवतु  इत्युदित्पठितो भातेर्डवतुरिति व्युत्पादितश्च । शत्रन्तात्तु ङीपि शप्श्यमोर्नुम् इति नित्यो नुम्।

उगितश्च **--** बालमनोरमा **--**

उगित् द्विविधं प्रातिपदिकं प्रत्ययश्च । तत्र प्रातिपदिकमुदाहरति - भवतीति । सर्वदिगणे भवतु इति अत्युत्पन्नं प्रातिपदिकं पठितं तस्य व्यपदेशिवत्त्वेन उगिदन्तत्वात् ङीप् । .... यदि तु सर्वादिगणे पठितं भवतु इत्येतत्  ’ भातेर्डवतुः ’ इति व्युत्पाद्यते तदा उगित्प्रत्ययान्तस्यैव उदाहरणं बोध्यम्।  भूधतोः शतरि .... भवच्छब्दात् ङीपि तु .... भवन्तीति रूपम् ।

माधवीयधातुवृत्तिः **(**भू सत्तायाम् **) ---**

अलिङ्गः संबोधनैकविषयश्च युष्मदर्थः , भवदर्थस्तु अन्यः इति तद्योगे प्रथमः।

यदा तु अस्मात् संबोधनविभक्तिः तदा युष्मदर्थयोगात्  मध्यमो भवति **-** हे भवन् भवसि इति ।

**(Haradatta does not accept this -** युष्मद्युपपदे **.... )**

‘मा‘ङ्याक्रोशे’- ... अस्मिन् गम्यमाने माङ्युपपदे शतृशानचौ भवतः - मा भवन्।

’उगितश्च ’ -- .... भवन्ती  .... हे भवन्ति ... ।

इतराभ्यो’पि दृश्यन्ते **( 5-3-14) -** महाभाष्यम् ---

भवदादिभिर्योगे इति वक्तव्यम् । के पुनर्भवदादयः ?

भवान्,...स भवान् , तत्र भवान्  , ततो भवान् ......

So, by and large, we may conclude --

1. भवति भिक्षां देहि is acceptable (मनुस्मृत्यनुरोधेन प्रयोगबाहुल्याच्च ) or it can be भवति ! (त्वम्) भिक्षां देहि । भवति = पूज्ये ( पूज्यार्थे - तत्र भवान् , तत्र भवती etc are acceptable to Panini et al).

2. If there are शिष्टप्रयोगाः then one may employ मध्यमपुरुष with भवच्छब्द - ' पृषोदरादीनि ...'.

शब्दरत्नः -

व्युत्पादितश्चेति । न्यासकृता इति शेषः । इदं व्युत्पादनम् अप्रामाणिकम् । भाष्यासंमतेः ।

उगितश्च -- महाभाष्यम् --

यदि विज्ञायते उगितः प्रातिपदिकादिति - सिद्धम्  भवती महतीति । अतिभवती अतिमहतीति न सिद्ध्यति ।

कैयटः **--**

भवतीति । सर्वदिषु भवतुशब्दः उगित्पठ्यते ....।

नागेशः **(**उद्योते**)** --

ननु भातेर्डवतौ निष्पन्नस्य भवतः नोगित्त्वम् , किन्तु उगिदन्तत्वमेव इत्यत आह - सर्वादिष्विति। तत्त्वनार्षमित्याहुः ।

नागेशः **(**लघुशब्देन्दुशेखरे **-** उगितश्च**)** --

भवतु इति उगितः प्रातिपदिकस्यापि सत्त्वात् ।

सर्वादीनि सर्वनामनि **(1-1-27) --** महाभाष्यम् **--**

अथ भवतः सर्वनामत्वे कानि प्रयोजनानि?  (Patanjali does not say भवतोः but भवतः, so the शब्द there is not भवतु but भवत् – 'अनकारान्तत्वात् ' कैयटः )

स च भवांश्च भवन्तौ । .... भवता हेतुना , भवतो हेतोरिति । 2. If there are शिष्टप्रयोगाः then one may employ मध्यमपुरुष with भवच्छब्द - ' पृषोदरादीनि ...' ।

This is to be explained --- Panini did touch भवच्छब्द -- सर्वादीनि.... - भवत् /भवतु  ; अत्वसन्तस्य चाधातोः ; उगितश्च ; भातेर्डवतुः - उणादयो बहुलम्म् ;इतराभ्यो'पि दृश्यन्ते ।

Patanjali employed --

... भवतः कः संप्रत्ययः? ; कुतो भवान् ? पाटलिपुत्रकात् ; तत्कारी च भवान् तद्द्वेषी च ; अङ्ग हि भवान् तमुच्चारयतु: अङ्ग हि भवान् अग्नौ .... प्रक्षालयतु etc.

Even in **शाङ्करभाष्यम् , श्रीभाष्यम्** , माध्वभाष्यम् , अणुभाष्यम् **,** शक्तिभाष्यम् **,** शाबरभाष्यम् **,** प्रशस्तपादभाष्यम्**,** न्यायभाष्यम् etc we do not come across a single usage of भवान् – मध्यमपुरुष.

कल्पः -- गृह्यसूत्रम् **--**

अधिदेवताप्रत्यधिदेवतासहितशनिग्रहमन्त्रजपं मदर्थं भवन्तः कुर्वन्तु (ऋत्विग्वरणम्) भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये (not युष्माभिः)।

**Let us take four Vedas** --

यूयं पात स्वस्तिभिः सदा नः ( ऋग्वेद and यजुर्वेद )

नमस्ते रुद्र मन्यवे ( नमकम् - शतरुद्रीयम् -- कृष्ण / शुक्लयजुर्वेदः )

त्वमग्ने रुद्रो महो दिवः .... पृक्ष ईशिषे ( कृ य )

त्वगं हि वेत्थ यथातथम् ( तै आर 2)

We can offer hundreds of examples.

There is no usage of भवत् + मध्यमपुरुष in any वेद ।

In लोक one may use युष्मत् / भवत् – i.e., both can be replaced by each other.

But, as the usages show, भवान् is used (in लोक) as a respectable form whereas त्वम् is a general term -- भवान् / तत्र भवान् / तत्र भवती. In वेद, since परभाव (चैतन्यम्) is being expressed , त्वम् is used - नमस्ते रुद्र , न्त्वमग्ने etc. So, the statement of माधवीयधातुवृत्ति is untenable.

>भवत् शब्द being Davatvant(ugit), why on ङीप्  no नुमागम? भवान् has नुमागम so why not in भवती? <  ----

उगिदचां सर्वनामस्थानेऽधतोः  7-1-70 - this is the नुमागमसूत्रम् - it does not apply because of the परिभाषा -- न वा विभक्तौ - लिङ्गविशिष्टाग्ग्रहणात् ( महाभाष्यम् ,

आद्यन्तवदेकस्मिन् (1-1-21) - see महाभाष्यम् under this सूत्रम् - एकपुत्रसत्त्वे स एव ज्येष्ठौः स एव मध्यमः स एव कनिष्ठः - this is called व्यपदेशिवद्भाव । भवत् is उगित् and उगिदन्त - check with भाष्यम् and कैयट under उगितश्च 4-1-6. In भवन्ती it is शप्श्यमोर्नित्यम् – नुम्.

आदिमध्यान्तेषु भवच्छब्दः प्रयोज्यो वर्णानुक्रमेण -- गौतमधर्मसूत्रम् 1-2-42

## मनः - चित्तम्

मनः -  चित्तम् ( स्वान्तम् / आत्मा / अन्तरङ्गम् )

**अमरकोशः - वेदान्तः -बृहदारण्यकोपनिषत् - कृष्णयजुर्वेदः - तैत्तिरीयोपनिषत् - शिक्षा - व्याकरणम् - न्यायः - वैशेषिकम् - सांख्यम् - योगः - कल्पः - प्रत्यभिज्ञादर्शनम् (तन्त्रम्) - आयुर्वेदः (चरकम् , सुश्रुतम्) - पुराणम् - काव्यम् - सदाशिवब्रह्मेन्द्रः**

This is at once a vast and complicated subject. Generally speaking, both the terms can be used as पर्यायs (पर्याय means 'turn', so you can use them by 'turn' but not  together - स्वर्गकामः, नाककामः , but not स्वर्गनाककामः - in निघण्टु it is a different case). But in certain contexts, one may prefer either term for the 'extra meaning' - योगः चित्तवृत्तिनिरोधः vs योगः मनोवृत्तिनिरोधः ।

So one has to keep in mind the surface and deep levels of meaning, especially in वेदान्त , योग and वैद्यकम्.

The administered injection / medicine has got more to do with चैतन्यम् than मनस्. The coconut water etc., has got a lot to do with चैतन्यम्. मनस् plays an important role in the physical and mental properties of the children to be born.

I shall weave across different fields of Indian culture, that are most relevant and try to explain the intricacies so that the idea / thinking of Indian intelligentsia would become clearer.

1. अमरकोशः **(1- धीवर्गः)** -

चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः (31) --

चिती संज्ञाने  भ्वादिः- नपुंसके भावे क्तः पा - चित्तम् । चिती + असुन्(सर्वधातुभ्य असुन् - उणादिः 4-189) ।  हृ + कयन् , दुगागमः - हृदयम् । क्षुब्धस्वान्तध्वान्त... पा 7-2-18 - स्वान्तम्। पद्दन्नस् .. पा 6-1-63 - हृत् । प्रज्ञाद्यण् - मानसम् । मन ज्ञाने दिवादिः असुन् - मनः । स्वान्तशब्देन बाह्येषु विषयेषु अविक्षिप्तम् अनाकुलं मन उच्यते - कैयटः । 7-2-18

सूत्रे मनः शब्देन विशिष्टं मन उच्यते, तत्रैव स्वान्तशब्दप्रयोगात् - नागेशः । 7-2-18

प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः (30)

चेतयते / चेतति - नन्द्यादित्वात् ल्युः 3-1-134 पा -- a living thing - such a thing does possess the मनस् (mind) .

2.वेदान्तः --

**शांकरभाष्यम् (ब्र सू 2-4-6)**

...... पञ्च बुद्धीन्द्रियाणि .... पञ्च कर्मेन्द्रियाणि । सर्वार्थविषयं त्रैकाल्यवृत्ति मनस्तु एकम् अनेकवृत्तिकम् । तदेव वृत्तिभेदात् क्वचिद् भिन्नवद् व्यपदिश्यते -- मनो बुद्धिरहङ्कारः चित्तं च ' इति। तथा च श्रुतिः कामाद्याः नानाविधाः वृत्तीः अनुक्रम्याह - एतत्सर्वं मन एव (बृ उ 1-5-3) ।

**3.**बृहदारण्यकोपनिषत् **(1-5-3)** --

अन्यत्रमना अभूवं नादर्शम् अन्यत्रमना अभूवं नाश्रौषम् इति मनसा ह्येव पश्यति मनसा श्रुणोति । कामः संकल्पो विचिकित्सा श्रद्धा अश्रद्धा धृतिः अधृतिः ह्रीः भीः इत्येतत् सर्वं मन एव ।

The above listed are different states of मनस् only.

शां भा **2-4-17** --

ननु मनसो'प्येवं वर्जनम् इन्द्रियत्वेन स्यत् , ' मनः सर्वेन्द्रियाणि च ' (मु उ 2-1-3) इति पृथक्व्यपदेशदर्शनात् । सत्यमेतत् । स्मृतौ तु एकादशेन्द्रियाणीति मनो'पीन्द्रियत्वेन श्रोत्रादिवत् संगृह्यते ।

आचार्य is referring to - इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ।

अमरकोशः - धीवर्गः -

मनोनेत्रादि धीन्द्रियम्

मनस् is not considered as as इन्द्रियम् by श्रुति but स्मृतिs do.

अन्तःकरणम् is given different names depending on the विषय ( subject) --

वेदान्तपरिभाषा (प्रत्यक्षपरि.) --

मनो बुद्धिरहङ्कारः चित्तं करणमान्तरम् ।

संशयो निश्चयो गर्वः स्मरणं विषया इमे ॥

संशयः - मनस् ; निश्चयः - बुद्धिः; गर्वः - अहङ्करः ; स्मरणम् - चित्तम् ( आन्तरं करणम् = अन्तःकरणम्) ।

पञ्चदशी 2-12

मनो देहेन्द्रियाध्यक्षं हृत्पद्मे गोलके स्थितम् ।

तच्चान्तःकरणं बाह्येष्वस्वातन्त्र्यात् विनेन्द्रियैः॥

4. कृष्णयजुर्वेदः --

चित्तं च स्वाहा , चित्तायेदं न मम । ...... मनश्चस्वाहा , मनस इदं न मम । ----- जयादिहोमः ।

चित्तिः सृक् । चित्तमाज्यम् । --- तै आर चित्तिप्रश्नः।

कल्पः - गृह्यसूत्रम् -

प्रजापतिं मनसा ध्यात्वा ।

मनस्समाधीयताम् , समाहितमनसः स्मः (पुण्याहवाचनम्)

5.तैत्तिरीयोपनिषत् --

तस्माद्वा एतस्मात् प्राणमयादन्यो'न्तर आत्मा मनो मयः - अनु 3

यतो वाचो निवर्तन्ते , अप्राप्य मनसा सह । ......तस्माद्वा एतस्मान्मनोमयात् अन्यो'न्तर आत्मा विज्ञानमयः तेनैष पूर्णः । -- अनु - 4

6.शिक्षा **(**पाणिनीया**)** --

आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया ।

मनः कायाग्निमाहन्ति ....

आत्मा = अन्तःकरणम् , संस्काररूपेण, स्वगतान् अर्थान् , बुद्ध्या - स्ववृत्त्या , समेत्य - एकबुद्धिविषयान् कृत्वा , तद्बोधनेच्छया मनःयुक्तं करोति । ( लघुशब्देन्दुशेखरः - संज्ञाप्रक.) ।

7. व्याकरणम् --

पाणिनि employed the term चित्त in the sense of प्राणी (living) and मनस् । अचित्त - is for अप्राणी (non-living) --

अचित्तहस्तिधेनोष्ठक् 4-2-46 , अचित्तादेशकालात् ठक् 4-3-96 , चित्तवति नित्यम् 5-1-88 , चितेः कपि 6-3-126 , वा चित्तविरागे 6-4-91 चित्तविराग is मनसः अप्रीतता ( dissatisfaction) - Patanjali did not attempt any of these सूत्रs . अणावकर्मकात् चित्तवत्कर्तृकात् 1-3-88 ,

मनः 3-2-42 , अरुर्मनः 5-4-97 , अप्राणिषु 2-3-17 , उपमानादप्राणिषु 5-4-97 , चूर्णादीन्यप्राणिषष्ठ्याः 6-2-133 ,

महाभाष्यम् --

Katyayana and Patanjali resort to both the ways while discussing चैतन्यम् - those having and not having on one side and following वेदान्त , all things have चैतन्यम् --

स्थाने"न्तरतमः **1-1-50** -

विषम उपन्यासः । चेतनावत्सु अर्थात् प्रकरणाद्वा लोके संप्रयोगो भवति । वर्णाश्च पुनरचेतनाः , तत्र किंकृतः संप्रयोगः ?

यद्यपि वर्णा अचेतनाः । यस्त्वसौ  प्रयुङ्क्ते स चेतनावान् ।

धातोः कर्मणः समानकर्तृकादिच्छायां वा 3-1-7 --

आशङ्कायाम् अचेतनेषूपसंख्यानम् (वा)

भा - आशङ्कायामचेतनेषु उपसंख्यानम् कर्तव्यम् । अश्मा लुलुठिषते । कूलं पिपतिषति । किं पुनः कारणं न सिद्ध्यति ? एवं मन्यते - चेतनावतः एतत् भवति इच्छा इति । कूलं च अचेतनम् । .....

शांकरभाष्यम् **-** ईक्षत्यधिकरणम् **(**ब्र सू) --

अचेतने'पि चेतनवदुपचारो भवति - कूलं पिपतिषति ।

दामहायनान्ताच्च **4-1-27** --

भा . ननु चेतनावत एतद्भवति - उत्क्रमणं वा अपक्रमणं वा , दाम च अचेतनम् ।

अचेतनेष्वपि चेतनवदुपचारो दृश्यते । तद्यथा - स्रस्तान्यस्या बन्धनानि , स्रस्यन्ते'स्या बन्धनानि इति।

सर्वस्य वा चेतनावत्त्वात् (वा)

अथ वा सर्वं चेतनावत् । एवंह्याह - कंसकाः सर्पन्ति , शिरीषो''यं स्वपिति , सुवर्चला आदित्यम् अनुपर्येति । आस्कन्द कपिलकेत्युक्ते तृणम् आस्कन्दति । अयस्कान्तमयः संक्रामति । ऋषिः पठति - शृणोत ग्रावाणः ।

कैयटः -

सर्वस्य वेति । आत्माद्वैतदर्शनेनेति भावः । ऋषिरिति । वेदः सर्वभावानां चैतन्यं प्रतिपादयतीत्यर्थः ।

नागेशः -

सर्वत्र परिणामदर्शनेन चेतनाधिष्ठानं विना च तदसंभवात् तदधिष्ठितत्वं ज्ञायते इति तात्पर्यम् ।

So, since we find परिणाम in every 'thing'  , all the things are different  forms of चैतन्यम् / ब्रह्मन्  - 'सर्वं खल्विदं ब्रह्म'।

किं पुनः कारणं कश्चित् जाग्रदपि वर्तमानकालं नोपलभते ?

मनसा प्रयुक्तानि इन्द्रियाणि उपलब्धौ कारणानि भवन्ति , मनसः असान्निध्यात् -- भाष्यम् , परोक्षे लिट्(3-2-115)

वाक्यपदीयम् --

भर्तृहरि says that the so called चैतन्यम् itself is in the form of शब्द --

सैषा संसारिणां संज्ञा बहिरन्तश्च वर्तते ।

तन्मात्रमनतिक्रान्तं चैतन्यं सर्वजन्तुषु ॥

अर्थक्रियासु वाक् सर्वान् समीहयति देहिनः ।

तदुत्क्रान्तौ विसंज्ञो'यं दृश्यते काष्ठकुड्यवत् ॥ 1- 126 , 127

8.न्यायवैशेशिके --

आत्मेन्द्रियार्थसन्निकर्षे ज्ञानस्य भावः अभावश्च मनसो लिङ्गम् -- वै सू 3-2-1

तदभावात् अणु मनः - वै सू 7-1-23 (तदभावात् = विभुत्वाभावात्)

तत्र आत्मा मनश्च अप्रत्यक्षे -- वै सू 8-1-1

आत्मनि आत्ममनसोः संयोगविशेषात् आत्मप्रत्यक्षम् -- वै सू 9-1-11 (आत्मप्रत्यक्षम् = प्रत्यगात्मप्रत्यक्षम्)

इच्छा-द्वेष-प्रयत्न- सुख-दुःख-ज्ञानानि आत्मनो लिङ्गम् इति - न्या सू 1-1-10

बुद्धिः उपलब्धिः ज्ञानम् इति अनर्थान्तरम् -- न्या सू 1-1-15

युगपत् ज्ञानानुत्पत्तिः मनसः लिङ्गम् -- न्या सू 1-1-16

9.सांख्यम् --

त्रिगुणमविवेकि विषयः सामान्यम् अचेतनं प्रसवधर्मि ।

व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ॥ --- सांख्यकारिका 20

सांख्यतत्त्वकौमुदी -

अविवेकि - यथा प्रधानं न स्वतो विविच्यते एवं महदादयो'पि न प्रधानात् विविच्यन्ते , तदात्मकत्वात्।

अचेतनम् - सर्व एव प्रधानबुद्ध्यादयो'चेतनाः न तु वैनाशिकवत् चैतन्यं बुद्धेरित्यर्थः

वैनाशिकः = बौद्धः ( अर्धवैनासिकः = वैशेषिकः - both the terms are coined by Samkaracarya in सूत्रभाष्यम्) ।

Bauddhas hold that बुद्धि is चेतनम् । For सांख्यs बुद्धि is अचेतनम्।

प्रधान / प्रकृति is अचेतन whereas पुरुष is चेतन - प्रधानम् is भोग्यम् and पुरुष is भोक्ता - so both of them unite , just like a lame person and a blind person , and such a union causes the सृष्टि ।

उभयात्मकम् अत्र मनः संकल्पकम् इन्द्रियं च साधर्म्यात् ।

गुणपरिणामविशेषात् नानात्वं बाह्यभेदाश्च ॥ --- सां का 27

Among the eleven इन्द्रियs , मनस् is उभयात्मकम् = बुद्धीन्द्रियम् , कर्मेन्द्रियं च् । Its existence is known thru संकल्प (संकल्पः कर्म मानसम्- अमरः) ।

अन्तःकरणम् त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम्।

सांप्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम् ॥ -- सां का 33

अन्तःकरणं त्रिविधम् - बुद्धिः , अहङ्कारः, मनः इति ।

10.योगः --

योगः चित्तवृत्तिनिरोधः यो सू 1-2

व्यासभाष्यम् --

चित्तं हि प्रख्याप्रवृत्तिस्थितिशीलत्वात् त्रिगुणम् ।

मनस् is built of three गुणs - सत्त्वम् ,रजस् and तमस् ।

वीतरागविषयं वा चित्तम् - यो सू 1-37

धारणासु च योग्यता मनसः - यो सू 2 - 53

Both the terms are used as synonyms.

11.कल्पः --

आपस्तंबगृह्यसूत्रम् (3 खण्डः 1पटलः 21सू) --

यस्यां मनश्चक्षुषोः निबन्धः तस्याम् ऋद्धिः न इतरत् आद्रियेत इत्येके

Some sages are of the view that if the bridegroom's mind and eyes have आसक्ति in a bride then there will be prosperity in terms of धर्म अर्थ् and काम and as such one need not go to ज्योतिषम् to know her गुणाः ।

12. प्रत्यभिज्ञादर्शनम् (तन्त्रम्) --

चैतन्यम् आत्मा -- शिवसूत्रम्

चैतन्यम् एव् आत्मा इत्यर्थः ।

13. आयुर्वेदः ----

How to know the mental and physical phenomena of a child? It depends upon the mind of the woman (whom she has in mind, especially during intercourse) -

गर्भोत्पत्तौ तु मनः स्त्रियाः यं जन्तुं व्रजेत् तत्सदृशं प्रसूते -- चरकम् **-** शारीरस्थानम् - 2-26

ते एते मनःशरीराधिष्ठानाः ---- सुश्रुतम् 1-34

These aforesaid four kinds of diseases have got मनस् and शरीरम् as their resort.

14. पुराणम् --

निषेकसमये यादृङ् नरचित्ते विकल्पना ।

तादृक्स्वभावसंभूतिः जन्तुः वसति कुक्षिगः ॥ गारुडम् ,उ खं **22-17,18**

This verse correlates with the above quoted चरकम् ।

चैतन्यं बीजरूपे हि शुक्रे नित्यं व्यवस्थितम् । ---- गारुडम् , उ खं **22-19**

**15.** काव्यम् -

का त्वं शुभे कस्य परिग्रहो वा किं वा मदभ्यागमकारणं ते ?

आचक्ष्व मत्वा वशिनां रघूणां मनः परस्त्रीविमुखप्रवृत्ति॥  -- रघुवंशः - 16

चेतो'नलं कामयते मदीयम्  -- नैषधम् ( दमयन्तीवचनम्)

This is a ग्रन्थग्रन्थि --

मदीयं चेतः नलं कामयते ; मदीयं चेतः अनलं कामयते ; मदीयं चेतः न लंकाम् अयते

16. सदाशिवब्रह्मेन्द्रः --

भज रे यदुनाथम् , मानस भज रे यदुनाथम्;

खेलति मम हृदये ..; चेतः श्रीरामम् ...

Others --

मानस संचर रे , ब्रह्मणि मानस संचर रे । मदशिखिपिञ्छालंकृतचिकुरे ...

स्मर वारं वारं, चेतः ! स्मर नन्दकुमारं, स्मर वारं वारम् ।

## तत्तु समन्वयात् - वाक्यार्थः

It was on the sidelines of a Lecture on Samkara's Teachings and the Present Day Society at SS Sanskit Uni, Kalady(Samkara Jayanti, 15May'13) that I was invited to do वाक्यार्थ at Sringeri Sakara Matha, Kalady.

Vidvan Nagarajabhatta of Sringeri was the अध्यक्ष।

I prefered Vedanta and तत्तु समन्वयात् (ब्र सू 1-1-4) was the सुत्रम् ।

Here is a question --

in the पूर्वपक्ष Samkaracarya says the following --

अत एव ’सो’रोदीत् ’ इत्येवमादीनाम् आनर्थक्यं मा भूदिति ’ विधिनात्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः’(जै सू 1-2-7) इति स्तावकत्वेन अर्थवत्त्वम् उक्तम्।

Here the sentence सो’रोदीत् यदरोदीत् तद्रुद्रस्य रुद्रत्वम् is निन्दार्थवाद and not स्तुत्यर्थवाद । Then how come आचार्य says स्तावकत्वेन ?

The relevant शाबरभाष्यम् --

अथ सो’रोदीत् इति कस्य विधेः शेषः? बर्हिषि रजतं न देयम् इत्यस्य ।

No need to consult - रत्नप्रभा , भामती / कल्पतरु / परिमळः, न्यायनिर्णयः , ब्रह्मामृतवर्षिणी / दीपिका or any Telugu translation. Scholars may throw their might.

Bonus Info --

I discussed the following during वाक्यार्थ --

ज्योतिषम् , न्यायः , मीमांसा , व्याकरणम्

There is similarity between अस्तङ्गतत्वदोष in ज्योतिषम् (मुहूर्त - सिद्धान्तस्कन्धौ) and the पूर्वपक्ष put forth by आचार्य --

अतो वेदान्तानामानर्थक्यम् अक्रियार्थत्वात् । कर्तृदेवतादिप्रकाशनार्थत्वेन वा क्रियाविधिशेषत्वम् , उपासनादिक्रियान्तरविधानार्थत्वं वा ।

It means वेदान्तवाक्यानि are very much there but they do not have any independence (ब्रह्मबोधकत्वम् नास्ति) -

In ज्योतिषम् there is अस्तङ्गतत्वदोष - also called मौढ्यम् --

गुरु kills one lakh defects whereas शुक्र kills one thousand --

बलवान् केन्द्रगस्सौम्यो हन्ति दोषशतत्रयम्।

द्यूनं विहाय दैत्येज्यः सहस्रं लक्षमङ्गिराः ॥ (कश्यपः)

If गुरु or शुक्र falls within 15 Degrees (भागाः) of रवि then it is called अस्तङ्गतत्वदोष during which they do not have any strength and as such there cannot be a मुहूर्त. In other words, both the planets are very much there but due to मौढ्यम् , are not in a position to exhibit their power. Rather it is रवि,who would give the (his) result.

Presently from वैशाखबहुलद्वादशी (चान्द्रमानम्/ 5-6-2013) to ज्येष्ठबहुलदशमी (2-7-1013) गुरुमौढ्यम् is running.

The वेदान्तवाक्यानि are without any capacity on their own just like गुरु and शुक्र , who are अस्तङ्गत ।

विधिशब्दविचारः --

न्यायः - विधिर्विधायकः (न्यायसूत्रम् 2-1-63)

मीमांसा - विधिरत्यनमप्राप्तौ (कुमारिलः)

व्याकरणम् - विपूर्वाद्धात्रः कर्मसाधन इकारः - विधीयते विधिरिति (महाभाष्यम् , समर्थः पदविधिः 2-1-1) | Patanjali means it is not विध (विधाने) + इन् (औणादिकः).

Thus, to me it appears that the upalakShaNa nyAya is to be adopted here.

Yes, following the commentary न्यायनिर्णय - धर्मजिज्ञासा entails अधर्मजिज्ञासा , as उपलक्षणम् taking चोदनात्वजाति ).

Elsewhere, धर्म entails अधर्म -- सर्वधर्मान् परित्यज्य -- धर्मशब्देन अत्र अधर्मो'पि गृह्यते नैष्कर्म्यसिद्धेः विवक्षितत्वात् (शांकरभाष्यम् - गीता , 18 - 66 ) - परित्यागत्वजाति।

But here the precise question is -- how can a sentence, which has got निन्दा as its inherent meaning , be interpreted to be denoting स्तुति?

No doubt, Jaimini would automatically be dragged into the discussion as he did not say anything about the purport of निन्दार्थवादाः anywhere in 12 / 16 Adhyayas (if सङ्कर्षकाण्ड is also taken as part of पूर्वमीमांसा -- ' षोडशलक्षणी ' says Ramanujacarya in श्रीभाष्यम्).

Bonus Info --

उपलक्षणम् - what is this ?

It is of two types –

1. Literally it means  - सूचनम् ।

If a word suggests another thing also - such a word is called  उपलक्षकम् or उपलक्षणम्. In other words , the तात्पर्यम् rather than the वाच्यार्थ is to be taken -- 'तात्पर्यार्थो’पि केषुचित् " (काव्यकाशः)।

तत् = वाक्यार्थः , तस्मिन् पराः = आसक्ताः  तत्पराः , तेषां भावः तात्पर्यम् , ब्राह्मणादित्वात् भावे ष्यत्र् ।

काकेभ्यः दधि रक्ष्यताम् -- is the sentence often offered as example . Here , the word काकेभ्यः means - 'any agent that is going to touch / spoil the curd , including काक and not simply काक only' -- काकशब्दः दध्युपघातकानां श्वादीनाम्  उपलक्षणम्।

Bhartrhari (वाक्यपदीयम् - वाक्यकाण्डः - 312) offers a लौकिकोदाहरणम् for अजहल्लक्षणा

काकेभ्यो रक्ष्यतां सर्पिः इति बालो’पि चोदितः ।

उपघातपरे वाक्ये न श्वादिभ्यो न रक्षति ॥

बालः अपि = a small boy who is not trained in such a शास्त्रार्थ.

न रक्षतीति न = निश्चयार्थे नञ्द्वयम् ।

द्रव्यनिर्वचनम् --

वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते ।

द्रव्यमित्युच्यते सो’र्थो भेद्यत्वेन विवक्षितः॥(वा प - पदकाण्डः - भूयोद्रव्यसमुद्देशः - 3)

2. जातिरूपधर्मः

विशेषणम्  x  उपलक्षणम्

The धर्म which is there in विशेष्यम् and  does not allow any other धर्म - is called विशेषणम् - कपिला गौः।

उपलक्षणम् is the one in a विशेष्यम्  that  allows other धर्मs also -- इदं सस्यं गोभ्यः रक्षेत्  - here गोभ्यः is उपलक्षणम् and as such suggests - not only cows but any animal that is going to consume the crop .

अट्कुप्वाङ्नुम्व्यवायेऽपि (पा सू  8-4-2) - here व्यवधानम् is उपलक्षणम् । As a result the व्यवधानम् can be separately or collectively --

व्यवायलक्षणार्थत्वाद् अट्कुप्वादिभिस्सह ।

प्रत्येकं वा समस्तैर्वा णत्वं न प्रतिषिध्यते ॥ (वा प वा कां 383).

Here the निन्दार्थवाद does not denote निन्दा of निन्द्य , rather स्तुति of स्तुत्य  thru नहिनिन्दान्याय (शाबरभाष्यम् - शाखान्तराधिकरणम् 2-4-2-21) --

न हि निन्दा निन्द्यं निन्दितुम् प्रयुज्यते । किं तर्हि ? निन्दितादितरत् प्रशंसितुम् । तत्र न निन्दितस्य प्रतिषेधो गम्यते , किंत्वितरस्य विधिः (न्यायशरीरम्) ।

Keeping this in mind Samkaracarya said - सोऽरोदीत् इत्यादीनां .......... स्तावकार्थत्वम् ।

Jaimini also meant the same and said - विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः।

स्तुत्यर्थवादानां निन्दार्थवादानां च स्तुतौ एव तात्पर्यम् लक्षणया इति भावः ।

प्रतिषेधवाक्यानां विधिशेषत्वम् अभिधीयते ।

As a result the रावणनिन्दा in Ramayana has got its purport in रामस्तुति । Similarly भारतम् etc. has to be taught.

In व्याकरणम् the प्रतिषेधसूत्रम् is considered as विधिशेष --

नियमः प्रतिषेधश्च विधिशेषस्तथा सति ।

द्वितीये यो लुगाख्यातः तच्छेषमलुकं विदुः ॥ (वाक्यपदीयम् - वाक्यकाण्डः 239)

अलुगुत्तरपदे (पा सू 6-3-1) is the शेष of सुपो धातुप्रातिपदिकयोः (पा सू 2-4-71)

A detailed discussion is available in महावाक्यविचारः।The following sentence is generally offered as an example for तात्पर्यम् --

विषं भुङ्क्ष्व मा चास्य गृहे भुक्थाः (भुङ्थाः is an अपशब्द)Here वाच्यार्थ is - do consume poison butdo not have food in this person's house.The तात्पर्यम् is - do not have food in thisperson'house.Anandavardhanacarya discusses विधि and निषेध in terms of वाच्यार्थ and ध्वनि।

## प्रमाणानि

| क्रमः | दर्शनम् | प्रमाण-सङ्ख्या | प्रमाणानि |
|---|---|---|---|
| १ | यजुर्वेदः | ४ | स्मृतिः, प्रत्यक्षम्, ऐतिह्यम्, अनुमानः |
| २ | मनुस्मृतिः | ३ | प्रत्यक्षम्, अनुमानम्, शाब्दम् |
| ३ | रामायणम् | ६ | प्रत्यक्षम्, अनुमानम्, उपमानम्, शाब्दम्, अर्थापत्तिः, अभावः |
| ४ | चार्वाकाः | १ | प्रत्यक्षम् |
| ५ | वैशेषिकाः | २ | प्रत्यक्षम्, अनुमानम् (केचन शाब्दवमपीच्छन्ति) |

| | | | |
|---|---|---|---|
| ६ | साङ्ख्याः/ योगिनः | ३ | प्रत्यक्षम्, अनुमानम्, शाब्दम् |
| ७ | नैयायिकाः | ४ | प्रत्यक्षम्, अनुमितिः, उपमानम्, शाब्दम् |
| ८ | मीमांसकाः भाट्टाः | ६ | प्रत्यक्षम्, अनुमानम्, उपमानम्, शाब्दम्, अर्थापत्तिः, अनुपलब्धिः |
| ९ | मीमांसकाः प्राभाकराः | ५ | प्रत्यक्षम्, अनुमानम्, उपमानम्, शाब्दम्, अर्थापत्तिः |
| १० | अद्वैतवेदान्तिनः | ६ | प्रत्यक्षम्, अनुमानम्, उपमानम्, शाब्दम्, अर्थापत्तिः, अनुपलब्धिः |
| ११ | वैयाकरणाः | १२ | प्रत्यक्षम्, अनुमानः, शाब्दम्, उपमानम्, अर्थापत्तिः, अभ्यासः, अदृष्टम्, प्रतिभा, अनुपलब्धिः, प्रत्यभिज्ञा, कोशः,ऐतिह्यम् |
| १२ | बौद्धाः | २ | प्रत्यक्षम्, अनुमानम् |
| १३ | जैनाः | ६ | प्रत्यक्षम्, परोक्षम् - स्मृतिः, प्रत्यभिज्ञा, ऊहा, अनुमानः, आगमः |

| | | | |
|---|---|---|---|
| १४ | पौराणिकाः | ८ | प्रत्यक्षम्, अनुमानम्, उपमानम्, शाब्दम्, अर्थापत्तिः, अनुपलब्धिः, सम्भवः, ऐतिह्यम् |
| १५ | तान्त्रिकाः/भरतः | ९ | प्रत्यक्षम्, अनुमानम्, उपमानम्, शाब्दम्, अर्थापत्तिः, अनुपलब्धिः, सम्भवः, ऐतिह्यम्, चेष्टा |
| १६ | विशिष्टाद्वैतिनः | ४ | प्रत्यक्षम्, अनुमानम्, उपमानम्, शास्त्रम् (वेदः) अर्थापत्तिः |
| १७ | आनन्दतीर्थाः | २ | प्रत्यक्षम्, शब्दः (अनुमानं तु श्रुत्यनुसारित्वेन प्रमाणम्, न तु स्वतन्त्रम्) |
| १८ | वल्लभाः | ४ | (अलौकिके विषये) वेदः, ब्रह्मसूत्रम्, भगवद्गीता, श्रीमद्भागवतम् |
| १९ | व्यवहारशास्त्रज्ञाः | २ | मानुषम्, दैवम् |
| २० | अर्थशास्त्रम् | ३ | प्रत्यक्षम् , परोक्षम् (आप्तवाक्यम् , अनुमितिः) |
| २१ | आयुर्वेदः | | |

| | | |
|---|---|---|
| चरके | ४ | आप्तोपदेशः , प्रत्यक्षम्, अनुमानम्, युक्तिः |
| सुश्रुते | ४ | प्रत्यक्षम्, आगमः, अनुमानः, उपमानः |

| | | | |
|---|---|---|---|
| २२ | भागवतम् | ४ | श्रुतिः, प्रत्यक्षम्, अनुमानम्, ऐतिह्यम् |
| २३ | भारतम् | ६ | प्रत्यक्षम्, अनुमानम्, उपमानम्,आगमः,अर्थापत्तिः,ऐतिह्यम् |

Narayanabhatta , the author of मानमेयोदय ( first part 'प्रमाणानि' only) asserts that the verse in Ramayanam 3-72-8) -

राम षड्युक्तयो लोके याभिः सर्वो'नुद्श्यते ... refers to six Pramanas . But all the three commentators ( and translators) took it as applicable to सन्धिविग्रह etc.(राजनीतिः - षाड्गुण्यम्). For Ramanujacarya 'शास्त्रम्' means वेदः । व्याकरणादिषु औपचारिकः प्रयोगः।

'विशिष्टाद्वैतिनो न प्रत्यक्षानुमानोपमानशब्दप्रमाणवादिनः। तन्मते उपमानं न पृथक्प्रमाणं तत्रैकदेशिनो स्मृतिमपि प्रमाणत्वेनाङ्गीकुर्वन्ति।'

-- मेघनादारिसूरिप्रणीते ' नयद्युमणि ' - ग्रन्थे (Vedic Uni, Tirupati,2010 , pp 188,189) इदमस्ति -

'तच्च प्रमाणं पञ्चविधम् - प्रत्यक्षमनुमानमुपमानं शास्त्रम् अर्थापत्तिरिति'

ननु भाष्यकारस्य प्रत्यक्षादित्रयमेव प्रमाणतया इष्टम् । अत एव प्रथमसूत्रे प्रत्यक्षादिप्रमाणत्रयस्य सविशेषविषयत्वमुक्त्वा 'प्रमाणसंख्याविवादे'पि ' इत्युक्तम् -- तन्न ;

एतद्भाष्यात् प्रमाणत्रयाङ्गीकाराप्रतीतेः। तदङ्गीकारे हि प्रमाणसंख्याविवादे'पि इति भाष्यं नर्जु....

अतस्तद्युक्तिसिद्धेभ्यः पूर्वकाण्डे वृत्तिकारग्रन्थसिद्धेभ्यः पञ्चप्रमाणेभ्यः अन्यूनानतिरिक्तप्रमाणसंख्याविवादे'पि इति भाष्यम् योजनीयम् । ......

अत आदिग्रहणम् उपमानादिपरमेव । अतः पञ्चविधमेव तत् ।

सर्वदर्शनसंग्रहे पूर्णप्रज्ञदर्शनारंभे तु - ' तदेतद्रामानुजमतं ..... प्रमाणत्रित्व.... '- इत्याद्युक्तम्।

-- अत्र तात्पर्यं सुधियो विभावयन्तु ।

-- at the beginning of पूर्णप्रज्ञदर्शनम् , in सर्वदर्शनसंग्रह , 'प्रमाणत्रित्वम्' is mentioned while drawing analogy with रामानुजदर्शनम्. But later it is said --

न च अनुमानस्य स्वातन्त्र्येण प्रामाण्यमस्ति । तदुक्तं कौर्मे -

श्रुतिसाहाय्यरहितम् अद्नुमानं न कुत्रचित्।

निश्चयात्साधयेदर्थं प्रमाणान्तरमेव च ॥

श्रुतिस्मृतिसहायं यत्प्रमाणान्तरमुत्तमम्।

प्रमाणपदवीं गच्छेन्नात्र कार्या विचारणा॥

न्यायकोश registers --

प्रत्यक्षं शब्दश्चेति प्रमाणे इति श्रीमदानन्दतीर्थभगवत्पादाचार्याः प्राहुः । एतन्मते तु अनुमानं श्रुत्यनुसारित्वेन प्रमाणम् न तु स्वातन्त्र्येणेति बोद्ध्यम् ।

Error - it should be उपमानम् and not उपमानः।

Bonus Info --

The often quoted sentence - वेदाः प्रमाण्म्' - is from गान्धर्ववेद ( सङ्गीतरत्नाकरः - स्वरादि .. - प्रथमाध्यायः). In पदमञ्जरी, हरदत्तमिश्र says it can be - वेदाः प्रमाणानि also.

अनुमानः --

यजुर्वेदः , व्याकरणम् , मीमांसा , श्रौतम् (कल्पः) , वैशेषिकम्

पुंलिङ्गस्य अनुमानशब्दस्य प्रयोगः कुत्रास्ति ?

1.यजुर्वेदे (अरुणप्रपाठके - तैत्तिरीयारण्यके) --

स्मृतिः प्रत्यक्षमैतिह्यम् । अनुमानश्चतुष्टयम् । एतैरादित्यमण्डलम् । सर्वैरेव विधास्यते ।

2.महाभाष्ये स्तः प्रयोगौ --

भूवादयो धातवः (1-3-1) , तस्य भावस्त्वतलौ (5-1-119) - को'सौ अनुमानः?

In the first case -क्रिया अनुमानगम्या. In the second case - द्रव्यम् अनुमानगम्यम् ।

I shall provide the texts of महाभाष्यम्, प्रदीपः and उद्योतः in both the cases -

भूवादयो धातवः --

भा . क्रिया नामेयम् अत्यन्तापरिदृष्टा अशक्या पिण्डीभूता निदर्शयितुम् । यथा गर्भो निर्लुठितः(गर्भो'निर्लुठितः) । सासौ अनुमानगम्या ।

को'सौ अनुमानः?

प्र. यो भावे ल्युट् स नपुंसकः । अन्यत्र तु अभिधेयवशात् अनियतलिङ्गः । अथ वा मन्यतेः घञि अनुमान इति रूपम् ।

उ. ननु ल्युडन्तत्वे नपुंसकत्वं स्यात् अत आह - यो भावे इति । तथा च करणे ल्युडिति भावः । अथ वेति । प्रौढ्या ।

तस्य भावस्त्वतलौ --

भा. अन्यच्छब्दादिभ्यो द्रव्यम् , तत्तु अनुमानगम्यम् । तद्यथा ओषधिवनस्पतीनां वृद्धिह्रासौ , ज्योतिषां गतिरिति । को'सौ अनुमानः?

प्र.अनुमीयते अनेनेति अनुमानशब्देन हेतुः उच्यते ।

उ. .... ये अश्वादिक्रियायाः प्रत्यक्षत्वं मन्यन्ते तन्मते'पि अनुमानविषयत्वम् , 'ज्योतिषां गतेः' इति तदुपन्यासः । प्रमाणवाच्यनुमानशब्दस्य नपुंसकत्वात् पुंस्त्वानुपपत्तेः आह - अनुमीयते अनेनेति । प्रकृते को हेतुरिति भाष्याक्षरार्थः ।

As is evident it is अनुमानः in the sense of अनुमानम् ।

Nagesa, may be, has forgotten what he discussed earlier under 1-3-1.

The word हेतुः , used by Kaiyata , is a synonym of अनुमानप्रमाणम् in वैशेषिकम् --

हेतुरपदेशो लिङ्गं प्रमाणं करणमित्यनर्थान्तरम् **(9-2-4)**

देशिकतिरुमलैताताचार्यशिरोमणिव्याख्या -

तत्र पदार्थसंसर्गविषयाम् अनुमितिरूपां प्रमां जनयन् शब्दः तत्र प्रमाणं भवति , हेतुश्च ।

The author of भाट्टचिन्तामणि , वाञ्छेश्वरयज्वा , at the beginning says -

अनुमानः इति  पुंलिङ्गशब्दस्य ( यजुर्वेदगत्स्य) छान्दसत्वात् साधुत्वम्।

Similarly, महादेव, the author of the commentary, वैजयन्ती, on सत्याषाढश्रौतसूत्रम् says - अनुमानः इति छान्दसत्वात् साधुत्वम्. Neither touched the usages in महाभाष्यम्.

प्रमादो धीमतामपि ।

अन्यत्र -

व्याख्यानः इति पाणिनिसूत्रे - 'तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः' (4-3-66)। अस्माभिस्तु व्याख्यानम् इति प्रयुज्यते ।

## शशशृङ्गम्

This is just to exhibit how different people understand a single thing due to their शास्त्रवासना. In व्याकरणम् it is बौद्धार्थ only - अर्थवदधातुः अप्रत्ययः प्रातिपदिकम् ( पा सू ). घटं कुरु means बुद्धिस्थं घटं बाह्यस्थं कुरु.

There is difference of opinion regarding the interpretation of the न्यायसूत्रम् - बुद्धिसिद्धं तु तदसत् ।

Kapila in his सांख्यसूत्रम् offers नृशृङ्गम् as an example.


शशशृङ्गम्
बौद्धार्थः (वैयाकरणाः)
असद्बुद्धिसिद्धम् (प्रचीननैयायिकाः)
अभूतम् / अभावः (वैशेषिकाः)
अपार्थकम् (उदयनः)
नव्यनैयायिकाः
शशे श्रृङ्गाभावः (गदाधरभट्टः)
सार्थकः अयोग्यः (जगदीशः)
अभावः (पदार्थभिन्नः) (प्राभाकराः)
अभावः अनुपलब्धेः (मीमांसकाः भाट्टाः)
अलीकम् / असत्ख्यातिः (नास्तिकाः)
विकल्पः (योगिनः)
तुच्छम् / अप्रामाणिकम् (अद्वैतवेदान्तिनः)
असत् (द्वैतवेदान्तिनः)
अत्यन्तासत् (श्रीहर्षः खण्डनकारः)
विज्ञानम् (बौद्धाः जैनाश्च)
अत्यन्ताभावः / असत् (साङ्ख्याः)

The graphic representation is from my new book - Pramanas in Indian Philosophy, which I just finished during Sabbatical.

The line अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि - is ascribed to Sriharsa - खण्डनखण्डखाद्यम् by many, including Nagesa (Manjusa) and the commentary thereupon – कला. The fact is that the line is from श्लोकवार्तिकम् (चोदनासूत्रम्- 6) -

अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि ।

तेनोत्सर्गे स्थिते तस्य दोषाभावात् प्रमाणता ॥

न्यायरत्नाकरः पार्थसारथिमिश्रस्य -

ज्ञानोत्पादहेतुत्वं प्रामाण्यहेतुः , सति तस्मिन् प्रामाण्यस्यौत्सर्गिकत्वात् शब्दश्चात्यन्तासत्यपि शशविषाणादौ ज्ञानमुत्पादयति । तदिह चोदनाया धर्मज्ञानजनकत्वात् उत्सर्गतः प्राप्तं प्रामाण्यम् अपवादभूतदोषाभावात् अनपोदितं भवति । (अपोद्यते बाध्यते अनेन इति अपवादः)

Sriharsa quotes the line in two places - अद्वैते प्रमाणविचारः ( परि 1) and भावलक्षणखण्डनम् (परि 4).

In the first instance - Sriharsa replaces the second leg of the verse --

अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि ।

अबाधातु प्रमामत्र स्वतः प्रामाण्यनिश्चलाम् ॥

The context is also different - ब्रह्मणः पदार्थत्वमपि न केवलं वाक्यार्थत्वम् - Sriharsa wants to prove - also it is स्वतःप्रामाण्यम् , i.e. परतः प्रामाण्यम् of Naiyayikasis is refuted.

प्रमाबाध्या प्रमाह्यत्र ह्यतः प्रामाण्यनिश्चयः - पाठान्तरम् in कला।

Earlier to Kumarila , Hari in Brahmakanda (130) of Vakyapadiyam discusses this aspect -

अत्यन्तमतथाभूते निमित्ते श्रुत्युपाश्रयात् ।

दृश्यते'लातचक्रादौ वस्त्वाकारनिरूपणा ॥

Samkaracarya in तैत्तिरीयोपनिशद्भाष्यम् offers this popular verse -

मृगतृष्णांभसि स्नातः शशशृङ्गधनुर्धरः ।

एष वन्ध्यासुतो याति खपुष्पकृतशेखरः \\

Patanjali discussed these aspects under स्त्रियाम् (पा  4-1-3).

अलातम् / अलातचक्रम्

न्यायसूत्रम् **(3-2-60) -**

अलातचक्रदर्शनवत् तदुपलब्धिराशुसंचारात्

(क्रियाणां न यौगपद्यम् आशुसंचारात् मनसः , तस्मात् न मनसो बहुत्वापत्तिः)

महाभाष्यम् **(**लटः शत्रुशानचावप्रथमासमानाधिकरणे **3-2-124)) -**

भवति वै प्रत्यक्षादपि अनुमानबलीयस्त्वम् । तद्यथा अलातचक्रं प्रत्यक्षं दृश्यते , अनुमानाच्च गम्यते 'नैतदस्ति' इति ।

वाक्यपदीयम् **(**वाक्यकाण्डः **291) -**

स्पर्शप्रबन्धो हस्तेन यथा चक्रस्य सन्ततः।

न तथालातचक्रस्य विच्छिन्नं स्पृश्यते हि तत् ॥

गौडपादीयकारिकाः**(**माण्डूक्योपनिषत् **-** अथर्व **.) -** अलातशान्तिः **- 49,50)**

अलाते स्पन्दमाने वै नाभासा अन्यतोभुवः।

न ततो'न्यत्र निस्पन्दान्नालातं प्रविशन्ति ते ॥

न निर्गता अलातात्ते द्रव्यत्वाभावयोगतः।

विज्ञाने'पि तथैव स्युराभासस्याविशेषतः॥

(किंच तस्मिन्नेवालाते स्पन्दमाने ऋजुवक्राद्याभासाः ... - शांकरभाष्यम्)

As is evident अलातम् / अलातचक्रम् is employed for different purposes by almost all Darsanakaras. It is difficult to fix the chronology for obvious reasons. Such examples have been coming since time immemorial.

शमदमादिसंपत्तिः is one of the prerequisites ब्रह्म जिज्ञासितुं ज्ञातुं च , न विपर्यये ।

This is what Gaudapada , Samkara and Anandagiri say --

स्वसिद्धान्तव्यवस्थासु द्वैतिनो निश्चिता दृढम्।

परस्परं विरुद्ध्यन्ते तैरयं न विरुद्ध्यते । ( माण्डूक्यकारिका 3-17)

(he is a great scholar but calls it माण्डूक्यकारिका rather than गौडपादकारिका )

इतश्च मिथ्यादर्शनं द्वैतिनां रागदोषादिदोषास्पदत्वात् , कथम् ? स्वसिद्धान्तव्यवस्थासु स्वसिद्धान्तरचनानियमेषु कपिलकणादबुद्धार्हतादिदृष्ट्यनुसारिणो द्वैतिनो निश्चिताः। एवमेवैष नान्यथेति तत्र तत्रानुरक्ताः प्रतिपक्षं चात्मनः पश्यन्तः तं द्विषन्त इत्येवं रागद्वेषोपेताः स्वसिद्धान्तदर्शननिमित्तमेव परस्परमन्योन्यं विरुद्ध्यन्ते ।

तैः अन्योन्यविरोधिभिः अस्मदीयो'यं वैदिकः सर्वानन्यत्वात् आत्मैकत्वदर्शनपक्षः न विरुद्ध्यते , यथा स्वहस्तपादादिभिः एवं रागद्वेषादिदोषानास्पदत्वात् आत्मैकत्वबुद्धिरेव सम्यग्दर्शनमित्यहिप्रायः (शां भा)

यथा स्वकीयकरचरणादिभिराघाते कदाचिदाचरिते'पि द्वेषो न जायते , परबुद्ध्यभावात् तथा द्वैताभिमानिभिरुपद्रवे क्षुद्रे कृते'पि नाद्वैतिनः तेषु द्वेषो जायते , सर्वानन्यत्वात् परबुद्ध्यभावात् इत्यर्थः (आ गि) ।

Let us maintin सुहृद्भाव -- अनुद्वेगकरं वाक्यं .. वाचिकं तप उच्यते ।

एवं विप्रतिपन्नबुद्धिभ्यः आचार्यः सुहृद्भूत्वा अन्वाचष्टे - महाभाष्यम् ।

For a clear picture of अद्वैतसिद्धान्त, earlier to Samkara, pl refer to Vakyapadiyam, especially वाक्यकाण्ड and पदकाण्ड.

In the present case , i.e. शशशृङ्गम् , आनन्दपूर्णमुनीन्द्रः , the author of खण्डनफक्किका (comm) , differs with श्रीहर्ष --

ननु अद्वैतादिपदं गृहीतसङ्गतिकं स्वार्थं प्रत्याययति , किं वागृहीतसङ्गतिकम् ? .... न च तत्र सङ्गतिग्रहणम् , शशविषाणस्य सकलप्रमाणविकलत्वात् । अतो'गृहीतसङ्गतिकाद्वैतादिपदात् तदर्थप्रतीतिः न स्यादिति न शक्यं वक्तुमिति प्रौढवादः ।

वस्तुतस्तु पदार्थत्वं नेष्यते ब्रह्मणः , किन्तु वाक्यार्थत्वम्। वाक्यं वाचा गृहीतसङ्गतिकमेव बोधयति ।

In the first परिच्छेद , सौगतब्रह्मवादिनोर्भेदः, Sriharsa offers his सिद्धान्त --

वस्तुतस्तु वयं सर्वप्रपञ्चसत्त्वासत्त्वव्यवस्थापननिवृत्ताः स्वतःसिद्धे चिदात्मनि ब्रह्मतत्त्वे केवले भारमवलम्ब्य चरितार्थाः सुखमास्महे ।

ये तु स्वपरिकल्पितसाधनदूषणव्यवस्थया विचारम् अवतार्य तत्त्वं निर्णेतुमिच्छन्ति तान् प्रति ब्रूमः - ' न साध्वीयं भवतां विचारव्यवस्था , भवत्कल्पितव्यवस्थयैव व्याहतत्त्वात् ' ।

अलातशान्तिः has got nothing to do with natural fire.

'उभयोः अग्रयोः अग्निविशिष्टः दण्डः अलातमित्युच्यते' - this definition offered by the author of प्रसन्नपदा (comm on न्यायभाष्यम्) is not in line with traditional belief . When a stick, with fire on either end, is rotated there will be an illusory fire-wheel and the same is अलातम् / अलातचक्रम् ।

Bonus info - Sriharsa (शब्दलक्षणखण्डनम्) refutes पदसंज्ञा of both Panini and Aksapada (कियदिदं रमणीयम् इति विद्वांसो विभावयन्तु ) --

सुप्तिङन्तं पदमिति केचित् , वर्णा विभक्त्यन्ताः पदमित्यन्ये । ....

अपशब्दे'पि पदलक्षणं गतमिति ।

तस्मात् पाणिनिना आचार्येण शब्दसिद्ध्यर्थे पदसंज्ञेयं रुत्वादिविद्ध्यनुरोधेन अपशब्ददशायामन्यैव कृता नदीसंज्ञावत् , न तु लौकिकपदव्यवहारसिद्ध्यर्थम् ।

साधुशब्दविशेषे ततश्च तस्यान्यदेव लक्षणं वाच्यम् ।

अन्यथा दाक्षीनन्दनोदीरितनदीसंज्ञाप्रत्यभिज्ञायां पाथः प्रार्थयमानः काननस्थलीमलीकाभिमानी भवानीहेत । (पाथः = जलम्)

## जातिः

It is 'जात्याकृतिव्यक्तयस्तु पदार्थः (व्यक्त्याकृतिजातयस्तु पदार्थः - पाठान्तरम्) न्यायसूत्रम् 2-2-67, not 'पदार्थाः', just like '... अभ्यास इति हेतुस्तदुद्भवे , हेतुर्नतु हेतवः' - काव्यप्रकाशः ,

‘अभ्यासवैराग्याभ्यां तन्निरोधः’ - योगसूत्रम् , 1-12 , तत् = चित्तवृत्तिः, तस्या निरोधः उभयाधीनः, न तु अन्यतराधीनः ।

यदि भेदविवक्षा विशेषगतिश्च तदा व्यक्तिः प्रधानम्, जात्याकृत्योः अङ्गत्वम्।

यदि अभेदविवक्षा सामान्यगतिश्च तदा जातिः प्रधानम् , व्यक्त्याकृत्योः अङ्गत्वम् – न्यायभाष्ये

**(**महाभाष्ये’पि ’समर्थः पदविधिः’ 2-1-1 इति सूत्रे एवमेव - ' उभयोरुभयं पदार्थः, कस्यचित् किञ्चित् प्रधानभूतं किञ्चित् गुणभूतम् ...') ।

‘आकृतेस्तु प्रधानभाव उत्प्रेक्षितव्यः’ - पिष्टकमयी गौः ।

As the time passed, only जाति and व्यक्ति are remained .

**Jaimini** held - आकृतिस्तु क्रियार्थत्वात् ( आकृत्यधिकरणम् , 1-3-33) ।

तन्त्रवार्तिकम् **--**

विषेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विषेषणे ।

आनन्त्यव्यभिचाराभ्यां शक्त्यनेकत्वदोषतः ।

न व्यक्तावाकृतौ तु स्यात् सर्वमेतत् समंजसम् ॥

अन्वयव्यतिरेकाभ्याम् एकरूपप्रतीतितः ।

आकृतेः प्रथमं ज्ञाने तस्या एवाभिधेयता ॥

व्यक्त्याकृत्योरभेदाच्च व्यवहारोपयोगिता ।

लिङ्गसंख्यादिसंबन्धः सामानाधिकरण्यधीः।

सर्वोपपन्ना च यतस्तस्मात् तत्रैव कल्पयेत्॥

श्लोकवार्तिकम्- आकृतिवादः **- 3**

जातिमेवाकृतिं प्राहुः व्यक्तिराक्रियते यया ।

सामान्यं तच्च पिण्डानामेकबुद्धिनिबन्धनम् ॥

Therefore, Mimamsaks had done away with आकृति, it is जाति / आकृति and व्यक्ति / द्रव्यम् for them. 'व्यज्यते इति व्यक्तिः , न सर्वं द्रव्यं व्यक्तिः' - Nyayabhasyam (आकाशः द्रव्यम् , न व्यक्तिः) ।

व्यक्तिर्गुणविशेषाश्रयो मूर्तिः **,** आकृतिर्जातिलिङ्गाख्या **,** समानप्रसवात्मिका जातिः **-** न्यायसू **.2-2-68,69,70 .**

जातिः , आकृतिः , व्यक्तिः - सर्वत्र क्तिचप्रत्ययः - **'** क्तिचक्तौ च संज्ञायाम् **'-** पाणिनि**3-3-174**

**Patanjali** employed the term आकृति in different senses--

पस्पशाह्निके **--**

'किं यत्तत् भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतं स शब्दः ? नेत्याह , आकृतिर्नाम सा '--

इति = आकृत्यनुशासनम् इति न आह , आकृतिः = जातिः ।

This जातिलक्षणम् is akin to 'नित्यम् एकम् अनेकानुगतम् सामान्यम्' of **Vaisesikas** .

सिद्धे शब्दार्थसम्बन्धे **--**

'आकृतिर्हि नित्या , द्रव्यमनित्यम् ... द्रव्यं हि नित्यम् , आकृतिरनित्या '

कैयटः - आकृतिः संस्थानम् ...

नागेशः - जातेरपीति , अनेन एतत्प्रकरणस्थाकृतिपदस्य व्यङ्ग्यव्यञ्जकोभयपरतां सूचयति । गौतमेनाप्युक्तम् - जात्याकृतिव्यक्तयस्तु पदार्थःइति ।

**In siddhanta - for Vedantins** जाति **is also** अनित्या **- '** अग्नेरग्नित्वमपागात् **'** इति छान्दोग्यश्रुतेः **। For others** जाति **is** नित्या**.**

जातेरस्त्रीविषयादयोपधात् **-** पाणिनिसूत्रम् **4-1-63**

भाष्यम् -- जातेरित्युच्यते , का जातिर्नाम ?

1.आकृतिग्रहणा जातिः ....

2. अपर आह -- प्रादुर्भावविनाशाभ्याम् सत्त्वस्य युगपद्गुणैः । असर्वलिङ्गां बह्वर्थां तां जातिं कवयो विदुः ॥

आकृतिग्रहणा = आकृतिः ग्रहणं यस्याः सा - अवयवसंनिवेशव्यङ्ग्या - तटी ।

असर्वलिङ्गत्वे सति एकस्यां व्यक्तौ सकृदुपदेशेन व्यक्त्यन्तरेषु सुग्राह्या - वृषली

गोत्रं च = अपत्यप्रत्ययान्तः - औपगवी , चरणैस्सह = शाखाध्येतृवाची - कठी , कलापी

Kaiyata says - since Patanjali said 'अपर आह' , the second verse is not acceptable to the latter. Some people defined - जननेन प्राप्यते इति जातिः.

## स्मृतिः - अभिज्ञा - प्रत्यभिज्ञा - अभिज्ञानम्

कृष्णयजुर्वेदः – व्याकरणम् – मीमांसा – वेदान्तः – न्ययः – वैशेषिकम् – योगानुशासनम् – प्रत्यभिज्ञादर्शनम् (पाशुपतम्)– सर्वदर्शनसंग्रहः – अद्वैतसिद्धिः – तत्त्वबिन्दुः – खण्डनखण्डखाद्यम् – अभिज्ञानशाकुन्तलम्

वेदः (तैत्तिरीयारण्यकम् – अरुणप्रपाठकः - 4) – स्मृतिः प्रत्यक्षमैतिह्यम् , अनुमानश्चतुष्टयम्, एतैरादित्यमण्डलम् सर्वैरेव विधास्यते । (य एको रुद्र उच्यते, असंख्यातास्सहस्राणि, स्मर्यते न च दृश्यते-59).

Here **Sayanacarya** comments – स्मृतिः अनुमेयश्रुतिमूलं मन्वादिशास्त्रम् ।

**Kalidasa in Raghuvamsa** (2) says श्रुतेरिवार्थं स्मृतिरन्वगच्छत् (Dileepa followed the cow).

**Vanchesvarayajva**, the author of Bhattadipika, at the beginning of his commentary quotes the above Veda and comments – अतिदेशवाक्यार्थस्मृतिः, तेन उपमानप्रमाणमुक्तं भवति।

